Digitized by eGangotri and Sarayu Trust.

Price Rs. /12/—

श्रीगणेशाय नमः ।

बृहद्देवता ।

प्रथमोऽध्यायः ।

मन्त्रदृग्भ्यो नमस्कृत्य समाम्नायानुपूर्वशः ।
सूक्तर्गर्धर्चपादानामृचु(१) वक्ष्यामि दैवतम् ॥ १ ॥
वेदितव्यं दैवतं हि(२) मन्त्रे मन्त्रे प्रयत्नतः ।
दैवतज्ञो हि मन्त्राणां तदर्थमधिगच्छति(३) ॥ २ ॥
तद्विदां(४) तदभिप्रायानृषीणां मन्त्रदृष्टिषु ।
विज्ञापयति विज्ञानं कर्माणि विविधानि च ॥ ३ ॥
न हि कश्चिदविज्ञाय याथातथ्येन दैवतम्(५) ।
लौकिकानां वैदिकानां(६) कर्मणां फलमश्नुते ॥ ४ ॥
प्रथमो भजते त्वासां वर्गोऽग्निमिह दैवतम् ।
द्वितीयो वायुमिन्द्रं वा तृतीयः सूर्यमेव च(७) ॥ ५ ॥
अर्थमिच्छन्नृषिर्दैवं यं यमाहायमस्त्विति ।

---

(१) ऋग्भ्य इति ख० ग० ङ० ।
(२) वेदितव्यं हि तत् सर्व्वमिति क० घ० ।
(३) तदर्थमविगच्छति इति ख० ।
(४) तद्वत्तानिति ख० घ० ।
(५) देवताः इति क० घ० ।
(६) लौक्यानां वैदिकानां वा इति ख० ग० ङ० ।
(७) सूर्य्यमेव तु इति क० घ० ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

प्राधान्येन स्तुवञ्कृत्या[१] मन्त्रस्तद्देव एव सः ॥ ६ ॥
स्तुतिस्तु नाम्ना रूपेण कर्मणा बान्धवेन च ।
स्वर्गायुर्धनपुत्राद्यैरर्थैराशीस्तु कथ्यते ॥ ७ ॥
स्तुत्याशिषौ तु यास्वृक्षु दृश्येते[२]ऽल्पास्तु ता इह ।
ताभ्यश्चाल्पतरास्ताः स्युः स्वर्गो याभिस्तु याच्यते ॥ ८ ॥
स्तुवन्तं[३] वेद सर्वोऽयमर्थयत्येष मामिति ।
स्तौतीत्यर्थं ब्रुवन्तश्च सार्थं मामेष[४] पश्यति ॥ ९ ॥
स्तुवद्भिश्च ब्रुवद्भिश्च ऋषिभिस्तत्त्वदर्शिभिः[५] ।
भवत्युभय[६]मेवोक्तमुभयं ह्यर्थतः समम् ॥ १० ॥
प्रत्यक्षं देवतानाम यस्मिन्मन्त्रे प्रदृश्यते[७] ।
तमेवाहुः सुसम्पन्नं मन्त्रं लक्षणसम्पदा ॥ ११ ॥
तस्मात्तद्देवतानाम्ना[८] मन्त्रे मन्त्रे प्रयोगवित्[९] ।
बहुत्वमभिधानाच्च[१०] प्रयत्नेनोपलक्षयेत् ॥ १२ ॥

---

(१) स्तुवन् भक्त्येति ग० घ० ।
(२) स्तुत्याशिषस्तु यास्वृक्षु दृश्यन्ते इति क० घ० ।
(३) स्तुवंति इति ख० ङ० ।
(४) योऽर्थमामेव इति क० ।
(५) स्तुवद्भिर्वा ब्रुवद्भिर्वा ऋषिभिर्मन्त्रदर्शिभिरिति ख० । मन्त्रेष्वर्थानुदर्शिभिरिति क० ग० ।
(६) भवत्युतथमिति क० घ० ।
(७) मन्त्रेऽभिधीयते इति ख० ग० ङ० ।
(८) तस्मात्तु देवतानाम्ना इति घ०, तस्मात्तु देवतां नाम्ना इति [illegible] ०।
(९) प्रयत्नतः इति घ० ।
(१०) बहुत्वमभिधानच्च इति क० घ० ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सम्पूर्णमृषिवाक्यं तु सूक्तमित्यभिधीयते ।
दृश्यन्ते देवता यस्मिन्नेकस्य[१] बहुषु द्वयोः ॥ १३ ॥
देवतार्षार्थच्छन्दोभ्यो[२]वैविध्यं तस्य जायते[३] ।
ऋषिसूक्तन्तु यावन्ति सूक्तान्येकस्य[४] वै स्तुतिः ॥ १४ ॥
देवतैका तु यावत्सु देवतायास्तदुच्यते[५] ।
यावदर्थसमाप्तिः स्यादर्थसूक्तं वदन्ति तत् ॥ १५ ॥
समानच्छन्दसो यासु[६] तच्छन्दःसूक्तमुच्यते ।
वैविध्यमेतत्सूक्तानामिह[७] विद्याद्यथातथम् ॥ १६ ॥
देवतानामधेयानि मन्त्रेषु त्रिविधानि तु ।
सूक्तभाञ्ज्यथ ऋग्भाञ्जि तथा नैपातिकानि तु ॥ १७ ॥
सूक्तभाञ्जि भजन्ते वै सूक्तान्यृग्भाञ्जि वै[८] ऋचः ।
मन्त्रेऽन्यदैवतेऽन्यानि[९] निगद्यन्ते प्रसङ्गतः[१०] ॥ १८ ॥

---

(१) त्रिचं तद्दृश्यते चास्मिन्नेतस्यामिति क० घ० । एकस्येत्यत्र एकस्मिन्निति घ० ।
(२) देवतार्षार्थच्छन्दस्तः इति ख० ।
(३) वैविध्यञ्च प्रजायते इति ख० ग० ङ० ।
(४) ऋषिसूक्तानि तान्यत्र यावन्त्येकस्येति क० घ० ।
(५) अस्मिन् श्लोकार्द्धस्थले ख० ग० ङ० पुस्तकेषु श्रूयन्ते तानि सर्व्वाणि ऋषेः सूक्तं हि तस्य तत् इति पाठो वर्त्तते ।
(६) याः स्युरिति ख० ग० ङ० ।
(७) वैविध्यमेवं सूक्तानामिहेति ख० ग० ङ० ।
(८) वै-इत्यत्र यैरिति क० ख० घ० ङ० ।
(९) यानि इति घ० ।
(१०) निगद्यन्तेऽत्र कानिचित् इति ख० ग० पुस्तकान्तरञ्च ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सालोक्यात्साहचर्याद्वा तानि नैपातिकानि तु।
तस्माद्बहुप्रकारेऽपि[१] सूक्ते स्यात्सूक्तभागिनी ॥ १९ ॥
देवता तद्यथासूक्तमविशेषं[२] प्रतीयते।
भिन्ने सूक्ते[३] वदेदेव देवतामिह लिङ्गतः ॥ २० ॥
तत्र तत्र यथावच्च मन्त्रान् कर्मसु[४] योजयेत्।
देवतायाः परिज्ञानात्तद्धि कर्म समृध्यते ॥ २१ ॥
आद्यन्तयोस्तु सूक्तानां प्रसङ्गपरिकीर्त्तनात्।
स्तोतृभिर्देवतास्तास्ता उपेक्षेतेह[५] मन्त्रवित् ॥ २२ ॥
तत् खल्वाहुः कतिभ्यस्तु कर्मभ्यो नाम जायते।
सत्वानां[६] वैदिकानां च[७] यदन्यदिह[८] किञ्चन ॥ २३ ॥
नवभ्य इति तैरुक्ताः पुराणाः[९] कवयश्च ये।
मधुकः श्वेतकेतुश्च[१०] गालवश्चैव मन्वते[११] ॥ २४ ॥
निवासात्कर्मणो रूपान्मङ्गलाद्वाच आशिषः।

---

(१) बहुप्रकारेऽपि इति क० ङ० घ०।
(२) अविशेष्येति ख०, अविशेष्यमिति ग० ङ० पुस्तकान्तरञ्च।
(३) भिन्नसूक्ते इति क० घ०।
(४) कर्म प्रयोजयेदिति ख०।
(५) देवतानाम्ना उपेक्षेतेह इति ख०। देवतानाम्नामपेक्षेतेह इति क० घ०।
(६) खत्वानामिति क०।
(७) वा इति क० ग०।
(८) यद्वान्यदिहेति क० घ०।
(९) पौराणा इति क० घ०।
(१०) मधुकाश्च तकेताश्चेति क० घ०।
(११) मन्यते इति क० ख० घ० ङ०।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यदृच्छयोपवसना[१]त्तथामुष्यायणाज्जपात्[२] ॥ २५ ॥
चतुर्थ इति तत्राऊर्याष्कगार्ग्यरथीतराः[३] ।
आग्निषोऽथार्थवैरूप्या[४] द्वाचः कर्मण एव च ॥ २६ ॥
सर्वाण्येतानि नामानि कर्मणाञ्चाह[५] शौनकः ।
आग्नीरूपञ्च वाक्यञ्च[६] सर्वं भवति कर्मतः ॥ २७ ॥
यदृच्छयोपवसना[७] त्तथामुष्यायणाच्च[८] यत् ।
तथा तदपि कर्मैव तच्छृणुध्वन्तु[९] हेतुतः[१०] ॥ २८ ॥
प्रजाः कर्मसमुत्था[११] हि कर्मतः सत्वसङ्गतिः[१२] ।
क्वचित् संज्ञायते[१३] सच्च निवासात्तत्प्रजायते[१४] ॥ २९ ॥
यादृच्छिकं तु नामाभिधीयते[१५] त्विह कुत्रचित्[१६] ।

---

(१) यदृच्छयोपवचनादिति क० ङ० घ० ।
(२) तथा मृष्यायणाच्चेति क० घ० ।
(३) रथन्तरा इति ख० ।
(४) आग्निषोऽथ च वैरूप्यात् इति क० घ० । आग्निषोऽर्थार्थवैरूप्यादिति ख० ङ० ।
(५) कर्म्मतस्त्वाह इति क० ग० ।
(६) वाच्यञ्च इति ख० ग० ङ० ।
(७) यदृच्छयोपवचनादिति ख० ।
(८) यदृच्छया निवासाच्च यद्वा मृष्यायणाच्चेति क० घ० ।
(९) तच्छृणु त्वं च इति ग० ।
(१०) हेतवः इति ख० ग० ङ० पुस्तकान्तरञ्च ।
(११) प्रजाकर्म्मसमुत्था इति क० ख० ।
(१२) कर्म्मणः सच्च जायते इति क०, सत्वगा गतिः इति ख० ।
(१३) सतो निवसते इति क० घ०, क्वचित् स जायते इति ग० ।
(१४) तच्च जायते इति घ० ।
(१५) नाम नामाधीयते इति ख० । यादृच्छिकं नाम नाम धीयते क० ङ० ।
(१६) यच्च कुत्रचिदिति ख०, यत्त्विह क्वचिदिति घ० ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

औपम्यादेव[१] तद्विद्याद्[२] भावस्यैवेह कस्यचित् ॥ ३० ॥
नाकर्मकोऽस्ति भावो हि न[३] नामास्ति[४] निरर्थकम् ।
नान्यच्च भावान्नामानि तस्मात्सर्वाणि कर्मतः ॥ ३१ ॥
मङ्गलात् क्रियते यत्तु नामोपवसनाच्च[५] यत् ।
भवत्येव तु सा ह्याशीः स्वस्त्यादेर्मङ्गलानि च[६] ॥ ३२ ॥
अपि कुत्सितनामाय[७]मिह[८] जीवेत्कथञ्चिरम् ।
इति क्रियन्ते नामानि भूतानां विदितान्यपि[९] ॥ ३३ ॥
मन्त्रा नानाप्रकाराः स्युर्दृष्टा वै[१०] मन्त्रदर्शिभिः ।
स्तुत्या चैव विभूत्या च वाक्प्रभावेण चात्मनः[११] ॥ ३४ ॥
स्तुतिः प्रशंसा निन्दा च संशयः परिदेवना[१२] ।
स्पृहाशीः कत्थना याञ्चा[१३]प्रश्नः प्रैषः प्रवह्लिका[१४] ॥ ३५ ॥
नियोगश्चानुयोगश्च श्लाघा विलपितञ्च यत् ।

---

(१) औपम्यादपीति ख०, औपम्यादिह इति ग० घ० ङ० ।
(२) तद्वत्ते इति घ० ।
(३) ना इति घ० ।
(४) तन्नामाह निरर्थकमिति ख० ।
(५) यच्च नामोपवचनच्च इति क० ख० घ० ।
(६) आशास्ते मङ्गलानि च इति क० घ० । मङ्गलादिहेति ख० ङ० ।
(७) अचिकित्सितनामायमिति ख० ।
(८) अपि इति घ० ।
(९) निन्दितान्यपि इति क० घ० ।
(१०) ये इति ग० ङ० पुस्तकान्तरञ्च ।
(११) प्रभावाद्देवतात्मन इति ख० ग० अन्यत्पुस्तकञ्च ।
(१२) परिवेदना इति क० ङ० ।
(१३) कथनायाञ्चेति क० ।
(१४) प्रवल्हिका इति ख० ग० ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

आचिख्यासा[१]ऽथ संलापाः पवित्राख्यान[२]मेव च ॥ २६ ॥
आहनस्या नमस्कारः प्रतिरोध[३]स्तथैव च ।
सङ्कल्पश्च प्रलापश्च प्रतिवाक्यञ्च नाम यत्[४] ॥ २७ ॥
प्रतिषेधोपदेशौ च प्रमादापह्नवौ च यत्[५] ।
उपप्रैषश्च यः प्रोक्तः सञ्चरो नाम[६] विस्मयः ॥ २८ ॥
आक्रोशोऽभिलवश्चैवा[७]क्षेपः शापस्तथैव च ।
उपसर्गो निपातश्च[८] नाम चाख्यातमित्यपि[९] ॥ २९ ॥
भूतं भव्यं भविष्यच्च पुमांस्त्र्यथ[१०]नपुंसकम् ।
एवंप्रकृतयो मन्त्राः सर्ववेदेष्विति स्थितिः[११] ॥ ४० ॥
तेषां निदर्शनार्थीया[१२] ऋचोऽर्धर्चाः पदानि च ।
ब्राह्मणे चाथ कल्पे च निगद्यन्तेऽत्र कानिचित्[१३] ॥ ४१ ॥

---

(१) आविख्यासेति ख० ।
(२) सल्लापाः परिवाख्यानं इति घ० ।
(३) प्रतिराधः इति घ० प्रतिषेधः इति अन्यत्पुस्तकच्च ।
(४) तथैव च इति ग० अन्यत्पुस्तकच्च ।
(५) च ह इति ग० अन्यत्पुस्तकच्च ।
(६) यश्च इति ख० ग० ङ० अन्यत्पुस्तकच्च ।
(७) आक्रोशोऽभिलवश्चैव इति ग० अन्यत्पुस्तकच्च, आक्रोशोऽभिप्लवश्चैव इति ख० ।
(८) उपसर्गा निपाताश्चेति क० घ०, उपसर्गा निपातश्चेति ख० ।
(९) चाख्यानमेव चेति क० ।
(१०) स्त्री च इति ग० अन्यत्पुस्तकच्च ।
(११) सर्व्ववेदेषु सर्व्वश इति ख० ग० ङ० अन्यत्पुस्तकच्च । सर्व्वदेवेष्विति स्थितिरिति घ० ।
(१२) वाक्यार्थदर्शनार्थीया इति ङ० अन्यत्पुस्तकच्च ।
(१३) विधौ कल्पे च देवे च निगद्यन्तेऽत्र कर्हिचिदिति क० घ० ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

शब्देनोच्चरितेनेह येन द्रव्ये प्रतीयते ।
तदाचरविधौ युक्तं नामेत्याहुर्मनीषिणः ॥ ४२ ॥
अष्टौ यत्र प्रयुज्यन्ते नानार्थेषु विभूतयः[१] ।
तन्नाम कवयः प्राहुर्भेदे वचनलिङ्गयोः ॥ ४३ ॥
क्रियासु वक्रीष्वभिसंश्रितो यः
पूर्वापरीभूत इहैक एव ।
क्रियाभिनिर्वृत्तिवशेन सिद्धु
आख्यातशब्देन तमर्थमाहुः ॥ ४४ ॥
क्रियाभिनिर्वृत्तिवशोपजातः
कृदन्तशब्दाभिहितो यदा स्यात् ।
सङ्ख्याविभक्त्यव्ययलिङ्गयुक्तो
भावस्तदा द्रव्यमिवोपलक्ष्यः[२] ॥ ४५ ॥
यथा नानाविधैः शब्दैरपश्यन्नृषयः पुरा ।
विविधान्यपि[३] वाक्यानि तान्यनुक्रमतः शृणु ॥ ४६ ॥
रूपादिभिः स्तुतिः प्रोक्ताऽथाशीः[४] स्वर्गादिभिस्तथा ।
यानि वाक्यान्यतोऽन्यानि[५] तान्यपि स्युरनेकधा ॥ ४७ ॥

---

(१) विभक्त्य इति ग० अन्यत्पुस्तकञ्च ।
(२) शब्देनेत्यादि भावस्तदा द्रव्यमिवोपलक्ष्यः इत्यन्तः सन्दर्भः क० घ० चिह्नितपुस्तकयोर्नोपलभ्यन्ते ।
(३) विविधानीह इति ख० ग० घ० ।
(४) आशीरिति क० ख० ग० ।
(५) यानि इति अन्यत्पुस्तकञ्च ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

मन्त्रे[१] प्रशंसा[क] भोजस्य[२] चित्रदृत्[ख] सौभरेः[३][ग]स्तुतिः।
आक्रोशार्थास्तु दृश्यन्ते [घ]माता चेत्यभिमेथति[४] ॥४८॥
ऋग्मोघमन्नं[ङ] निन्दा च[५] शापो[च] येमेत्यृगेव तु।
याञ्चा[६] [छ]यदिन्द्रचित्रेति चेपो भीदमिति त्वृचि ॥४९॥
आशीस्तु[ज] वात आवातु दण्डेति परिदेवना[७]।
प्रश्नश्च प्रतिवाक्यञ्च[झ] पृच्छामि त्वेत्यृचौ पृथक् ॥५०॥
संशयोऽधःस्विदासीच्च[ञ] कत्थना[८] स्या[ट]दृहं मनुः।
इमं नो[ठ] यज्ञमित्यस्यां[ड] नियोगः[९] पाद उच्यते[१०] ॥५१॥

---

(१) मन्त्रः इति क० घ०।
(२) प्रसङ्गाद्भोजस्य इति क० घ० मन्त्रप्रशंसा भोजस्येति ग०।
(३) सौभरस्तुतिरिति ख०।
(४) मा नामेत्याभिमेष्यति इति ख०, माता मेत्यभिमेथति इति क०ङ०।
(५) ऋग्मोयमनतिदाच इति ख०।
(६) यास्यां इति ख०, याच्चा इति ग०, यच्ना इति घ० ङ०।
(७) दण्डादिपरिवेदना इति घ०, दण्डेतिपरिवेदना इति ख० च०।
(८) संशयोधः स्विदासीदिस्त्कत्थना इति क० घ०, कच्छना इति ङ०।
(९) यज्ञमित्याद्यानियोगः इति ख०।
(१०) उत्तमे इति क० घ०।

(क) ऋ० १०,१०७,१०। (ख) ऋ० ८,२१,१८। (ग) ऋ० ८,१९, २। (घ) ऋ० १,१६०, २१; १८५, १०। (ङ) ऋ० १०, ११७, ६। (च) ऋ० ८, २७, २०। (छ) ऋ० ५,३९, १। (ज) ऋ० १०,१८६, १। (झ) ऋ० १, १६४, ३४। (ञ) ऋ० १०, १२९, ५। (ट) ऋ० ४, २६, १। (ठ) ऋ० १, १, ४। (ड) ऋ० १, २६, १।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

(क)इह ब्रवीत्वनुयोगः संलाप(१)स्तृगुपोपमे(२)(ख) ।
प्रतिषेधोपदेशौ(३) तु अत्रैर्मैत्य(ग)त्वसंस्तुतौ(४) ॥५ २॥
आख्यान(५)न्तु हये जाये(घ) विलापस्तु(६)नदस्य मा(ङ) ।
अवीरामिव मां(च) श्लाघा(७) सुदेव इति(छ) तु स्पृहा ॥५ ३॥
नमस्कारः(ज) शुनःशेपे,(८) नमस्ते अस्तु विद्यते ।
सङ्कल्पयन्निदं तुल्योऽहं स्यामिति यदुच्यते(९) ॥५ ४॥
सङ्कल्पस्तु(झ) यदिन्द्राहं प्रलापस्त्वेतशस्य नुः(ञ)(१०) ।
महानग्न्याहनस्या तु प्रतिरोधो भुगित्युत(११) ॥५ ५॥

---

(१) सल्लाप इति क० ग० घ० ।
(२) ऋगुपोपमे इति ख० ग० अन्यत्पुस्तकच्च ।
(३) प्रतिषेधापदेशौ इति घ० ङ० ।
(४) अत्रैरित्यत्वसंस्तुत, इति घ० ।
(५) आख्यातमिति पुस्तकान्तरम् ।
(६) स्यादिति ख० ग० पुस्तकान्तरच्च ।
(७) अवीरामात्मनः श्लाघा इति ख० ग० घ० ।
(८) नमस्कारो मत ऋषे इति क० घ० शैष इति ख०, शेषे इति ङ० ।
(९) यां कल्पयन्ति नो रयः परित्रासूक्तमिह ते इति क० ।
(१०) यः इति ख० ग० ङ० पुस्तकान्तरच्च ।
(११) महानग्न्याह नस्यास्मात्प्रतिरागो भुगित्यपि इति ख०, भुगित्यपि इति ग०, भुगित्यभि इति पुस्तकान्तरं ।

(क) ऋ० १, ३५, ६ । (ख) ऋ० ८, ८२, ४ । (ग) ऋ० १०, ३४, १३ । (घ) ऋ० १०, ९५, १ । (ङ) १, १७९, ४ । (च) ऋ० १०, ८६, ९ । (छ) ऋ० १०, ९४, १४ । (ज) ऋ० १, २४, १२, १३ । (झ) ऋ० ८, १४, १ । (ञ) ऋ० ६, १५, ५ ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

प्रमादस्खेष[१]हन्ताहं[क] नमष्ठ[ख] इत्यभिप्लवः[२] ।
इन्द्राकुत्सेत्युपप्रैषो[ग][३] न विजानामि[घ] संज्वरः ॥ ५ ६ ॥
होतापचदिति प्रैषः[४] को अद्यैति तु विस्मयः ।
जामन्न[५]पङ्गवो नेति वितताद्रिः[ङ] प्रवह्निका[६] ॥ ५ ७ ॥
[च]न मृत्युरासीदित्येतामाचिख्यासां[७] प्रचक्षते[८] ।
अभिशापो[९]प्रजाः सन्तु भद्रं[१०]माशीस्तु[छ] गौतमे[११] ॥ ५ ८ ॥
बह्वप्येवं प्रकार[१२]न्तु शक्यं द्रष्टुमिहार्षजम्[१३] ।

---

(१) प्रमोदस्खेष इति घ० ।

(२) प्रमादस्खेकहन्ताहं नमस्ख इत्यन्हव इति ख०, नसस्ख इत्यपन्हवः इति ग० ।

(३) इन्द्राकुत्सेत्कपप्रैषो इति ख०, इन्द्राभरेत्युपप्रैषो इति क० ङ० ।

(४) होतापचदितिप्रैषा इति ख० ।

(५) जामये इति घ०, जामन्नु इति ग०, यामनु इति ख० ।

(६) प्रवल्हिका इति ख० ग० ।

(७) नाचिख्यासमिति क०, माविह्यासामिति ख०, माचिख्यासमिति घ० ।

(८) प्रचक्षसे इति क०, प्रचक्षमे इति ख० ।

(९) आविशापोः इति ख० ।

(१०) रुद्रमिति ख० ।

(११) ल्गौतमे इति ख० ।

(१२) ब्रह्ममेव प्रकारमिति ख० ।

(१३) इतीदृशमिति ख० ग० पुस्तकान्तरञ्च ।

(क) ऋ० १०, ११९, ९ । (ख) ऋ० ७, ३८, १० । (ग) ऋ० ५, ३१, ९ । (घ) ऋ० १, १६४, ३७ । (ङ) ऋ० १, १५२, ४ । (च) ऋ० १०, १२९, २ । (छ) ऋ० १, ७९, १० ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

वक्तुं प्रयोगतश्चैषामृक्सूक्तार्धर्चसंश्रितम्[१] ॥ ५९ ॥
एते तु मन्त्रवाक्यार्था देवतां सूक्तभागिनीम्[२] ।
संश्रयन्ते[३] यथान्यायं स्तुतिस्त्वत्रानुमानिकी[४] ॥ ६० ॥
भवद्भूतं भविष्यच्च जङ्गमं स्थावरञ्च यत्[५] ।
अस्त्येके[६]सूर्यमेवैकं प्रभवं प्रलयं विदुः ॥ ६१ ॥
[क]असतश्च [ख]सतश्चैव [ग]योनिरेषा[७] [घ]प्रजापतिः ।
त्यद्[ङ]त्तरञ्चा[च]व्यय[८]ञ्च यच्चैत[छ]द्ब्रह्म[९]शाश्वतम् ॥ ६२ ॥
कृत्वैव[१०] हि[ज] त्रिधा[झ]त्मानमेषु लोकेषु [ञ]तिष्ठति ।

---

(१) ऋक्सूक्तार्धर्चशस्त्विति इति क०, चैषा युक्मुक्तार्धर्चसंश्रितमिति ख० ।
(२) देवतां सूक्तभागिनामिति क० घ०, देवता सूक्तभागिनी इति ख० ।
(३) संभूयते इति ख० ।
(४) त्वा आनुमानिकी इति ख०, तत्रानुमानिकी इति घ० ।
(५) भवद्भूतस्य भव्यस्य जङ्गमस्यावरस्य च इति ख० ग० पुस्तकान्तरञ्च ।
(६) एते इति क० घ० ।
(७) एषामिति क० ।
(८) यदक्षरञ्च वाच्यमिति ग०, वाक्यमिति ङ० पुस्तकान्तरञ्च ।
(९) यथैतद्ब्रह्म इति ग० ङ० पुस्तकान्तरञ्च ।
(१०) कृत्वैष इति ख० ग० पुस्तकान्तरञ्च ।

(क) ऋ० ५, १२, ४ । (ख) ऋ० १, ३६, ३ । (ग) ऋ० १, १०४, १ । (घ) ऋ० ४. ५३, २ । (ङ) ऋ० १, १६४, ४२ । (च) ऋ० ६, ३७, ३ । (छ) ऋ० १, १०, ४ । (ज) ऋ० १, ११७, २४ । (झ) ऋ० १, १६३, ६ । (ञ) ऋ० १, ५१, ११ ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

(क)देवान् यथायथं(ख) सर्वान् निवेश्य(ग) स्वेषु(घ) रश्मिषु ॥ ६ ३॥
एतद्भूतेषु(१) लोकेषु अग्निभूतं स्थितं त्रिधा ।
(ङ)ऋषयो (च)गीर्भि(छ)रर्चन्ति व्यञ्जितं(२) (ज)नामभि(झ)स्त्रिभिः॥ ६ ४॥
तिष्ठत्येव च(३) (ञ) भूतानां(ट) जठरे जठरे ज्वलन्।
त्रिस्थानं चैनमर्चन्ति होत्रायां(ठ) वृक्तबर्हिषः ॥ ६ ५ ॥
दृष्टैष(ड) पवमानो(ढ)ऽग्नि(४)र्मध्यमोऽग्निस्तु(ण) पावकः(५) ।
अमुष्मिन्नेष(६) विप्रैस्तु लोकेऽग्निः(त) शुचिरुच्यते ॥ ६ ६ ॥
दृहाग्निभूतस्त्वृषिभिर्लोके स्तुतिभिरीडितः(७) ।
(थ)जातवेदाः स्तुतो मध्ये स्तुतो(द) वैश्वानरो दिवि ॥ ६ ७ ॥

---

(१) एतमेवैषु इति क० घ० ।
(२) व्यञ्जिनमिति ङ० घ० पुस्तकान्तरञ्च ।
(३) एष च इति ख०, एष हीति ग० पुस्तकान्तरञ्च ।
(४) पवमानाग्निरिति क० घ० ।
(५) वनस्पतिरिति ख० ग० ङ० पुस्तकान्तरञ्च ।
(६) अमुष्मिन्नेव इति ग० ङ० पुस्तकान्तरञ्च ।
(७) ईलितः इति क० ख० ङ० ।

(क) ऋ० १, १, २ । (ख) ऋ० १, १९१, ८ । (ग) ऋ० ८, ८४, ८ । (घ) ऋ० १, १३४, ४ । (ङ) ऋ० १, ४८, १४ । (च) १, ९, ९ । (छ) ऋ० १, १०, १ । (ज) ऋ० १, १५५, ६ । (झ) ऋ० ८, ५९, ५ । (ञ) ऋ० ३, २७, ९ । (ट) ऋ० १, १०४, ९ । (ठ) ऋ० १, ३, ३ । (ड) ऋ० ८, १०१, १४ । (ढ) ऋ० १, १, २ । (ण) ऋ० १, ६०, ४ । (त) ऋ० १, ६६, १ । (थ) ऋ० १, ७७, ५ । (द) १, ५९, ६ ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

(क)रसान् रश्मिभि(ख)रादाय(ग) वायुनाऽयं गतः सह(१)।
(घ)वर्षत्येष च यल्लोके(ङ) तेने(च)न्द्र (छ)इति स स्मृतः(२) ॥ ६८ ॥
(ज)अग्नि(झ)रस्मि(ञ)न्नयेन्द्रस्तु मध्यमो(३)(ट)वायुरेव च।
(ठ)सूर्यो (ड)दिवीति विज्ञेयास्तिस्र एवेह(४) देवताः ॥ ६९ ॥
एतासामेव माहात्म्यान्नामान्यत्वं विधीयते।
तत्तत्स्थानविभागेन तत्र तत्रोपलक्षयेत्(५) ॥ ७० ॥
(ढ)तासा(ण)मियं (त)विभूतिर्हि (थ)नामानि यदनेकशः।
(द)आऽस्तासान्तु मन्त्रेषु(ध) कवयोऽन्योऽन्ययोनिताम्(६) ॥७१॥
यथास्थानं(न) प्रदिष्टास्ता(७) नामान्यत्वेन देवताः।

---

(१) सह संस्तुतः इति क० घ०।
(२) तु स्तुतः इति क० घ०।
(३) मध्यतः इति ग०।
(४) एवहि इति क० घ०।
(५) तत्र तत्रेह दृश्यते इति ग० ङ० पुस्तकान्तरञ्च।
(६) अन्योऽन्ययोगितामिति ख०।
(७) स्तु इति क०।

(क) ऋ० १, १९, ८। (ख) ऋ० ४, २६, ६। (ग) ऋ० १, १४, १०। (घ) ऋ० ५, ८४, ३। (ङ) ऋ० १, २१, ६। (च) ऋ० १, २, ५। (छ) ऋ० १, १०९, ३। (ज) ऋ० १, १, २। (झ) ऋ० १, ९, ९। (ञ) ऋ० १, ४, ३। (ट) ऋ० १, १३४, ३। (ठ) ऋ० १, २३, १७। (ड) ऋ० १, ६, १। (ढ) ऋ० १, ३२, ८। (ण) ऋ० १, ४८, ७। (त) ऋ० १, ३०, ५। (थ) ऋ० १, ७२, ३। (द) ऋ० १, ११८, ३। (ध) ऋ० ५, ५७, ८। (न) ऋ० ३, ३०, १२।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तद्भक्तास्तत्प्रधानाश्च(क) केचिदेवं वदन्ति ताः(१) ॥ ७२ ॥
(ख)पृथक् (ग)पुरस्ताद्ये तूक्ता(२) लोकादिपतय(घ)(३)स्त्रयः ।
(ङ)तेषा(च)मात्मैव तत्सर्वं यद्यद्भक्तिः प्रकीर्त्यते(४) ॥ ७३ ॥
तेजस्त्वे(छ) वायुधं(५) प्राङ्गर्वाहनश्चैव तस्य तत्(६) ।
(ज)इमामैन्द्रीञ्च (झ)दिव्याञ्च (ञ)वाचमेवं पृथक् स्तुताम् ॥ ७४ ॥
बहुदेवतायाः (ट)स्तुतयो द्वन्द्वशः स्तुतयश्च(७) याः ।
प्राधान्यमेव सर्वासु(८) पतीनामेव(९)(ठ) ताखपि ॥ ७५ ॥

---

(१) नैवं केचिद्वदन्ति तु इति क० घ०, तु इत्यत्र ताः इति पुस्तकान्तरं ।
(२) येत्यूक्ता इति ख०, पुरस्ताद्यौरुक्ता इति घ० ।
(३) लोकाधिपतयः इति क० घ ।
(४) यदन्यद्भक्तिः कीर्त्यते इति क० घ० ।
(५) तेजस्ते वायवः इति क० ङ०, वायवाः इति ग० । तेजसे वायवा इति ख०, ।
(६) यस्य यत् इति क० ख० ग० ङ० पुस्तकान्तरञ्च ।
(७) द्विवत्सं स्तुतयश्च इति ग० ङ० पुस्तकान्तरञ्च, द्विवत्सं ततयश्च इति ख० ।
(८) प्राधान्यमेषां भूतानां इति क० घ० ।
(९) इव इति ख० ग० ङ० ।

(क) ऋ० ५, ३७, २ । (ख) ऋ० १, १३१, २ । (ग) ऋ० १, १२३, १० । (घ) ऋ० १, ३४, २ । (ङ) ऋ० १, २, १ । (च) ऋ० १, ११५, १ । (छ) ऋ० २, १५, ४ । (ज) ऋ० १, ३१, १६ । (झ) ऋ० ९, ९७, १७ । (ञ) ऋ० १, ४०, ६ । (ट) ऋ० ६, ३४, १ । (ठ) ऋ० २, २८, ९ ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

(क)स्थानं (ख)नामानि भक्तीश्च(१) देवतायाः स्तुतौ स्तुतौ ।
सम्पादयन्नुपेक्षेत(२)याङ्गाञ्चिदिह सम्पदम् ॥ ७६ ॥
अग्निभक्तिस्तु तान् सर्वान(ग)ग्नावेव(३) समापयेत् ।
यदिन्द्रभक्ति तच्चैन्द्रे(४) (घ)सूर्ये(५) सूर्यानुगच्च(ङ) यत् ॥ ७७ ॥
निरूप्यते(६) हविं(च)र्यस्मै(७) सूक्तन्तु (छ)भजते च (ज)या ।
(झ)सैव (ञ)तत्र प्रधानं स्यान्न(८)निपातेन (ट)याः (ठ)स्तुताः ॥७८॥
(ड)इति(९)त्रयाणामेतेषा(१०) (ढ)मुक्तः सामासिको विधिः ।
समासेनैवमुक्तस्तु(११) विस्तरेण त्वनुक्रमः(१२) ॥ ७९ ॥

---

(१) भक्तिश्चेति क० घ० ।
(२) संवादो यस्त्वपेक्षेत इति क० ।
(३) या सर्व्वामग्नावेव इति क० ।
(४) यदिन्द्रभक्तितश्चैन्द्रे इति क० घ० ।
(५) सौर्य्ये इति ङ० पुस्तकान्तरञ्च ।
(६) निरूप्यत इति घ० ।
(७) यस्मै इति घ० ।
(८) तत्र तत्र प्रधानोऽसौ न इति क० घ० ।
(९) इह इति क० घ० ।
(१०) एवैषामिति ग० ।
(११) समापद्यन्तु तत्सर्व्वमिति क० घ० ।
(१२) अनुक्रमादिति घ० ।

(क) ऋ० ५, ७६, ४ । (ख) ऋ० १, ७२, ३ । (ग) ऋ० १, १२४, १ । (घ) ऋ० १, २३, १७ । (ङ) ऋ० १, १, ६ । (च) ऋ० १, १२, १ । (छ) ऋ० १, ९४, २ । (ज) ऋ० १, १२३, ४ । (झ) ऋ० १, २२, २ । (ञ) ऋ० १, ४८, १० । (ट) ऋ० १, ६, ६ । (ठ) ऋ० १, १७, ६ । (ड) ऋ० १, २३, १७ । (ढ) ऋ० ४, ३७, ७ ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अवश्यं वेदितव्यो हि नाम्ना[१] [क]सर्वस्य विस्तरः।
न हि [ख]नामान्यविज्ञाय [ग]मन्त्राः शक्या हि वेदितुम्॥८०॥
सत्वान्यमूर्त्तान्यपि च [घ]देवता च[२] महर्षयः।
तुष्टुवुर्ऋषयः शक्त्या[३][ङ] तासु तासु स्तुतिष्विह[च] ॥८१॥
यैस्त्वग्नि[४][छ]रिन्द्रः [ज]सोमश्च [झ]वायुः [ञ]सूर्यो [ट]बृहस्पतिः।
[ठ]चन्द्रोऽथ[ड]विष्णुः[ढ]पर्जन्यः[ण]पूषा चा[५][त]ऽप्यृभवो[६][थ]ऽश्विनौ॥८२
[द]रोदसी [ध]मरुतो [न]देवाः[७] [प]पृथिव्यापः [फ]प्रजापतिः।

---

(१) नाम्नां इति क० ङ०, नाम्नः इति घ०।
(२) देवतावदिति क० घ०।
(३) तुष्टुवुश्च प्रशंसुश्चेति क० घ०।
(४) यैरग्निरिति घ०।
(५) वा इति ख० ङ० पुस्तकान्तरञ्च।
(६) पूषोषा भगवः इति क० घ०।
(७) देव्यः इति क० घ०।

(क) ऋ० १०,१३७,६। (ख) ऋ० १, ७२, ३। (ग) ऋ० ६,१०,१४। (घ) ऋ० १, २२, ५। (ङ) ऋ० २, २८, ९। (च) ऋ० १, १, २। (छ) ऋ० १, १, २। (ज) ऋ० १, २, ५। (झ) ऋ० १, १८, ४। (ञ) ऋ० १, १३४, ३। (ट) ऋ० १, २३, १७। (ठ) ऋ० १, १५०, ३। (ड) ऋ० १, २२, १६। (ढ) ऋ० ४, ५७, ८। (ण) ऋ० १, २३, १४। (त) ऋ० १, ११०, १। (थ) ऋ० ५, ७५, ७। (द) ऋ० १, १६७, ५। (ध) ऋ० १, १५, २। (न) ऋ० १, २३, १९। (प) ऋ० १, २२,१६। (फ) ऋ० ४, ५३, २।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

(क)देवौ च (ख)मित्रावरुणौ पृथक् सह च ता(ग)वुभौ ॥८३॥
(घ)विश्वे च देवाः (ङ)सविता (च)त्वष्टा वै रूपकृन्मतः(१) ।
(छ)अश्वो(ज)ऽन्न(झ)मृत्विजो(ञ)वज्रो(१)(ट)ग्रावाणो रथसंयुतः(२) ॥७४॥
(ठ)सुताः पृथक् पृथक् (ड)स्वैः स्वैः सूक्तैर्ऋग्भिश्च(४) (ढ)नामभिः ।
सुतौ सुतौ प्रवक्ष्यामि (ण)तानि (त)तेषामनुक्रमात् ॥८५॥
व्यवस्थे(थ)न्मन्त्रमाग्नेयं लिङ्गै(द)रग्नेश्च(५) लक्षितम् ।
हविष्यङ्गिः(६) प्रधानैश्च(७) नामाङ्कानैश्च केवलैः ॥८६॥

---

(१) रूपकृन्मुखः इति घ० ।
(२) यज्ञः इति घ० ।
(३) रथसंयुगः इति घ० ।
(४) सूक्तेष्वृक्षु च इति घ० ।
(५) तु इति घ० ।
(६) हविष्यङ्कि इति ग० घ०, हविर्भिर्ङ्गिरितिपाठः समीचीनः ।
(७) निरूप्यैवमिति घ० ।

(क) ऋ० ६, ५९, ५ । (ख) ऋ० १, ३५, १ । (ग) ऋ० १, १७९, ६ । (घ) ऋ० १, ८९, १० । (ङ) ऋ० १, २२, ८ । (च) ऋ० १, ३२, २ । (छ) ऋ० १, ३६, ८ । (ज) ऋ० १, १४०, २ । (झ) ऋ० १, ६०, ३ । (ञ) ऋ० १, ५१, ७ । (ट) ऋ० १, ८९, ४ । (ठ) ऋ० ४, ३७, ७ । (ड) ऋ० १, ६८, ४ । (ढ) ऋ० १, १५५, ६ । (ण) ऋ० १, ५३, ६ । (त) ऋ० १, २, १ । (थ) ऋ० १, ३१, १३ । (द) ऋ० १, २४, २ ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

ऐन्द्रस्तु[(क)(१)] मन्त्रो[(२)] वायव्यैर्लिङ्गै[(ख)]रैन्द्रैश्च लक्ष्यते[(३)] ।
नामधेयैश्च[(४)] [(ग)]वज्रस्य बलहत्या बलेन च ॥ ८७ ॥
सौर्यस्तु लिङ्गैः[(घ)] सूर्यस्य[(५)] गुणैः सर्वैस्तु[(६)] तैजसैः ।
[(ङ)]नामभिश्चैव[(७)] चन्द्रस्य सूक्तञ्च[(८)] [(च)]भजतेऽत्र यैः[(९)] ॥ ८८ ॥
एतासां[(१०)] देवतानान्तु नामधेयानुकीर्त्तनैः ।
[(छ)]यस्य यस्येह यावन्ति न व्यवस्यन्त्य[(ज)]तो[(११)][(झ)]ऽन्यथा ॥ ८९ ॥
[(ञ)]अयं प्रयोगस्त्वेतेषां[(ट)] ज्योतिषां[(१२)][(ठ)] त्रिषु[(ड)] वर्त्ततां ।

---

(१) ऐन्द्रैस्तु इति ख० घ० ।
(२) मन्त्रैः इति घ० ।
(३) लक्षितमिति घ० ।
(४) नामभिश्चैव इति क० घ० ।
(५) सौर्य्यैश्च इति घ० ।
(६) च इति ख० घ० ।
(७) नामधेयैश्चेति ख० ग० ङ० ।
(८) सूर्य्यन्तु इति क० घ० ।
(९) यः इति ङ० पुस्तकान्तरञ्च, अखिलैरिति घ० ।
(१०) अन्यासामिति घ० ।
(११) न व्यवस्यत्यतः इति ग० घ० ।
(१२) ज्योतिःषु इति ख० घ० ।

(क) ऋ० १, १४७, ४ । (ख) ऋ० ३, ५३, ८ । (ग) ऋ० ५, ३२, ७ । (घ) ऋ० १, १४, ६ । (ङ) ऋ० १, १५५, ६ । (च) ऋ० १, १२३, ४ । (छ) ऋ० १, ५, ४ । (ज) ऋ० १, ६, ९ । (झ) ऋ० ४, ३२, ८ । (ञ) ऋ० १, १६, ७ । (ट) ऋ० १, ११३, १ । (ठ) ऋ० १, १५, ४ । (ड) ऋ० १, ८९, २ ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

लोकेषु मन्त्रवि[क]द्विद्वान् प्रयोगेनावसीदति ॥ ९० ॥
[ख]नीयतेऽयं नृभिर्यस्मा[ग]न्नयत्य[घ]स्मा[ङ]दसौ च तं[१] ।
[च]तेने [छ]मौ च [ज]क्रतुः [झ]कर्म सनामानौ पृथक् पृथक्[२] ॥९१॥
य[ञ]द्विद्यते च[ट] जातस्य[३][ठ] जातैर्यद्वाऽत्र[४]विद्यते ।
तेनेमौ तुल्यनामानावुभौ लोकौ समाप्नुतः[५] ॥ ९१ ॥
विसृजन्नयमेतेषां[६] [ड]भ्राजते व्योम्नि [ढ]मध्यमः ।
निपातमात्रे कल्प्यन्ते[७] तथा[८]ग्नेयानि कानिचित् ॥ ९२ ॥

---

(१) सक्तादिति घ० ।
(२) सनातनौ इति घ० ।
(३) यत्नस्येति ख०, जातः सन् इति घ० ।
(४) चयेति घ० ।
(५) समश्नुता इति घ० ।
(६) सृजन्तिरयमेकस्तु इति घ०, विसृज्य नयमेतेषामिति ख० ।
(७) कल्पन्ते इति घ०, कथ्यन्ते इति ग० ।
(८) तस्य इति घ० ।

(क) ऋ० १, २४, १३ । (ख) ऋ० ९, २७, ३ । (ग) ऋ० ४, २१, ४ । (घ) १, १७१, ४ । (ङ) ऋ० १, १०५, १६ । (च) ऋ० १, २१, ६ । (छ) ऋ० २, ४०, २ । (ज) ऋ० १, १७, ५ । (झ) ऋ० १, ३१, ८ । (ञ) ऋ० १, ४४, ६ । (ट) ऋ० १, ९६, ७ । (ठ) ऋ० ५, १५, २ । (ड) ऋ० १०, २०, ३ । (ढ) १, १६४, १ ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

(क)अर्चिभिः(ख) केश्ययं(१) त्वग्निर्विद्युद्भिश्चैष(२) मध्यमः ।
असौ तु(ग) रश्मिभिः(३) केशी तेनैनामाह(४) केशिनः(घ) ॥ ९३ ॥
एतेषां तु पृथक्त्वेन त्रयाणां केशिनामिह ।
संलक्ष्यन्ते प्रक्रियासु त्रयः केशिन इत्यृचि(५) ॥ ९४ ॥
न चैवैषां(६) प्रसूतिर्वा विभूतिः स्थानजन्म वा(७) ।
निर्वक्तुं शक्यमेतैर्हि कृत्स्नं व्याप्तमिदं जगत् ॥ ९५ ॥
(ङ)वैश्वानरं(८) श्रितो ह्यग्निरग्निं(९) वैश्वानरः श्रितः ।
अनयो(च)र्जातवेदाश्च तथैव(छ) जातवेदसि(१०) ॥ ९६ ॥

---

(१) ऋचिभिः केश्वयं इति ख०, अर्चिर्भिः केश्ययमिति ङ० ।
(२) स्त्वेव इति ग० घ० ।
(३) कुरश्मिभिरिति ख० ।
(४) तेन नानाह इति घ० ।
(५) प्रक्लिप्तानि क्रतवश्च हवींषि च इति घ० ।
(६) नत्वेवैषां इति घ० ।
(७) विभूतिस्थानजन्म वा इति ख० ग० ।
(८) वैश्वानरे इति क० घ० ।
(९) अग्नौ इति क० घ० ।
(१०) तु तथैनौ जातवेदसी इति क० ख० ग० ङ० ।

(क) ऋ० ५, ७९, ८ । (ख) ऋ० १०, १०२, ६ । (ग) ऋ० १, १९, ८ । (घ) ऋ० १, १६४, ४४ । (ङ) ऋ० ७, ५, ५, । (च) ऋ० १, ७७, ५ । (छ) ऋ० ६, १६, ४२ ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सालोक्याच्चैकजातत्वाद्[१] व्याप्तिमत्त्वात्तु तैजसः[२] ।
तस्य तस्येह[३] देवत्वं दृश्यन्ते ते [४]पृथक्[५] स्तुताः ॥९७॥
यत्त्वाग्नेयमिति ब्रूमः[६] सूक्तभाक् तत्र[७] पार्थिवः ।
जातवेदस्यमित्युक्ते सूक्तेऽस्मिन् मध्यमः स्मृतः[८] ॥ ९८ ॥
वैश्वानरीयमिति तु यत्र ब्रूमो[९]ऽथ वा क्वचित् ।
सूर्यसूक्तस्य[१०] भाक्तत्र ज्ञेयो वैश्वानरस्तुतौ[११] ॥ ९९ ॥
सूर्यप्रसूतावग्नी तु दृष्टौ[१२] पार्थिवमध्यमौ ।
एतेषामेव लोकानां त्रयाणामध्वरेऽध्वरे ॥ १०० ॥
[क]रोहात्प्रत्यवरोहेण चिकीर्षन्नाग्निमारुतम्[१३] ।

---

(१) एकजन्याच्चेति क० घ० ।
(२) व्याप्तिमत्त्वाच्च तेजसः इति क० घ० ।
(३) यस्य यस्येह इति क० घ०, तस्य तस्य ह इति ख० ङ० ।
(४) च इति ख० ग० ।
(५) स्तुतिषु इति घ० ।
(६) यत्त्वाग्नेयमिति ब्रूम इति ग०, यत्त्वाग्नेयमिति घ० ।
(७) सूक्तं भक्त्या तु इति क० घ० ।
(८) सूक्तं भक्त्या तु मध्यमः इति घ० ।
(९) इत्युक्ते यद्ब्रूयामो इति क० घ० ।
(१०) सूर्य्यः सूक्तस्येति ग० ।
(११) सूर्य्यभक्तस्य सूर्य्यस्य ज्ञेयो वैश्वानरो दिवि इति क० घ० ।
(१२) दृशौ इति ख०, दृश्यौ इति क० घ० ।
(१३) चिकीर्षन्नग्निमारुतमिति ग० ।

(क) ऋ० १, ५६, २ । 6089

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

शस्त्रं[१] वैश्वानरीयेण सूक्तेन प्रतिपद्यते ॥ १०१ ॥
ततस्तु मध्यमस्थाना देवतास्त्वनुशंसति[२]।
इन्द्रञ्च[३] मरुतश्चैव स्तोत्रियेऽग्नि[४]मिमं पुनः ॥ १०२ ॥
तथैत[५]दुक्तमेतेषां विभूतिस्थानसम्भवम्।
यथा[६] च देवदेवस्य तत्र तत्रेह दृश्यते ॥ १०३ ॥
यद्यत्र पृथिवीस्थानं पार्थिवं चाग्निमिश्रितम्[७]।
तत्सर्वमानुपूर्व्वेण[८] कथ्यमानं निबोधत ॥ १०४ ॥
जातवेदाः[क] श्रितो ह्य[९]ग्नि[ख]मग्निं वैश्वानरः[ग] श्रितः[घ]।

---

(१) शास्त्रमिति ग०।
(२) मध्यमे स्थानाद्देवतास्त्वनुशंससि इति ख०, देवतास्त्वत्र शंसति इति घ०।
(३) रुद्रञ्चेति ग०।
(४) स्तोत्रियाग्निमिति घ०।
(५) यथैतदिति ख० ग० घ०।
(६) तथा इति ख० ग० ङ०।
(७) वाग्निमिश्रितमिति क० घ०, वाग्विमिश्रितमिति ङ०।
(८) आनुपूर्व्येणेति ग० घ० ङ०।
(९) अपि इति घ०।

(क) ऋ० ३, ७७, ५। (ख) ऋ० १, १, १। (ग) ऋ० १, ५९, ६। (घ) ऋ० १, ७५, ३।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

द्रविणोदा[क]स्तथेध्म[ख]श्च श्रितश्चाग्निं[१] तनूनपात्[ग] ॥ १०५॥ ॥
नराशंसः[घ] श्रितश्चैन[ङ] मेन[२]मेवाश्रित[३]स्त्विलः[च] ।
वर्हिर्द्वार[छ]श्च देव्यो[ज]ऽग्नि[४]मेन[५]मेव तु संश्रिताः ॥ १०६ ॥
नक्तोषा[झ] सा च देव्यौ[६] च होतारा[ञ]वेतदाश्रयौ[७] ।
देव्य[८]स्तिस्रः श्रिताश्चैनं त्वष्टा[ट] चैवैतदाश्रयः ॥ १०७ ॥
श्रितो वनस्पति[ठ]श्चैनं[९] स्वाहाकृतय[ड] एव च ।
अश्वश्च[ढ] शकुनिश्चैव मण्डूका[ण]श्चैतदाश्रयाः[१०] ॥ १०८ ॥

---

(१) अग्निरिति घ० ।

(२) एतमेनमिति ग०, एवमेतमिति घ० ।

(३) आश्रिता इति ख० घ० पुस्तकान्तरञ्च ।

(४) देवोऽग्निमिति ख० ।

(५) एतमिति घ० ।

(६) दैव्यौ इति ङ० ।

(७) एतदाश्रितौ इति घ०, होतारौ च तदाश्रयौ इति पुस्तकान्तरं ।

(८) देव्या इति ग० ।

(९) एवमिति ख० ।

(१०) तदाश्रया इति ख० ।

(क) ऋ० १, १५, ७-९ । (ख) ऋ० ८, ४५, २ । (ग) ऋ० १, १८८, २ । (घ) ऋ० १, १४२, ३ । (ङ) ऋ० १, ९, २ । (च) ऋ० १, १२८, १ । (छ) ऋ० १, १३, ६ । (ज) ऋ० १, १४०, ७ । (झ) ऋ० १, १३, ७ । (ञ) ऋ० १०, ६५, १० । (ट) ऋ० १, ३२, २ । (ठ) ऋ० १, ९०, ८ । (ड) ऋ० ९, ५, ११ । (ढ) ऋ० १, ३६, ८ । (ण) ऋ० ७, १०३, ७ ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

(क)ग्रावाण(१)श्चैन(२)मत्ता(३)(ख)श्च नराशंसस्तथा रथः(ग) ।
(घ)दुन्दुभिश्चेषुधि(ङ)श्चैव(४) हस्तघ्नो(च)(५) भीशवो(६) धनुः(छ) ॥ १ ० ९ ॥
(ज)ज्या चैतदाश्रितेषुश्च(७) श्रिता अश्वाजनी(झ)(८) च या ।
(ञ)वृषभो द्रुघण(९)श्चैल(ट)(१०) मेतं पितुरुलूखलम्(११)(ठ) ॥ १ १ ० ॥
नद्यश्चैवैनमापश्च सर्वाश्चौषधयस्तथा(१२) ।
रात्र्यश्चाग्राव्य(ड)रण्यानिः(ढ)(१३) श्रद्धे(ण)ला(त)पृथिवी(थ)तथा(१४) ॥१११॥

---

(१) श्रावणा इति ख०, ग्रावण इति ग० ।
(२) एवमिति ख०, एतमिति घ० ।
(३) भत्ता इति ग० ।
(४) एनमिति ग०, एतमिति ङ०, पुस्तकान्तरञ्च ।
(५) हस्तघ्नी इति पुस्तकान्तरं ।
(६) अभीषव इति पाठः सुसङ्गततया भाति ।
(७) आश्रयेषुरिति घ० ।
(८) आश्वाजनी इति ख०, चाश्वाजनी इति घ० ।
(९) वृषभो द्रुयण इति ग०, वृषाहद्रुघण इति घ० ।
(१०) एनमिति ग० ङ० पुस्तकान्तरञ्च, एवमिति घ० ।
(११) वृषभेदुष्यणश्चैलमैषैतं पितुमुलूखलमिति ख० ।
(१२) सहेति ख०, सर्व्वा ओषधयश्च हेति ग० ङ० पुस्तकान्तरञ्च ।
(१३) रात्रिरथाक्षेप्यरण्यानी इति ख०, रात्र्यघाग्राव्यरण्यानी इति ग० ङ०, आदर्शपुस्तकमात्रे अरण्यानीति दीर्घस्वरान्तपाठोऽस्ति ।
(१४) श्रद्धा द्यावा पृथिव्यथेति क० घ० ।

(क) ऋ० १, ८९, ४ । (ख) ऋ० ९, ४३, ५ । (ग) ऋ० १, ३०, १८ ।
(घ) ऋ० १, २८, ५ । (ङ) ऋ० ६, ७५, ५ । (च) ऋ० ६, ७५, १४ ।
(छ) ऋ० ६, ७५, २ । (ज) ऋ० ६, ७५, ३ । (झ) ऋ० ५, ६२, ७ ।
(ञ) ऋ० १, ३१, ५ । (ट) ऋ० १०, ९५ १८ । (ठ) ऋ० १, २८, ६ ।
(ड) ऋ० ५, ४६, ८ । (ढ) ऋ० १०, १४६, २ । (ण) ७, ३२, १४ ।
(त) ऋ० १, १३, ९ । (थ) ऋ० १, २२, १३ ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

भजते चैन(१) मेवोर्व्वी(क)(२) द्वन्द्वभूते च रोदसी(ख)(३)।
मुषलोलूखले(ग) चैनं(४) हविर्धाने च ये स्मृते ॥११२॥
जोष्ट्री(५)चोर्जाञ्जती(घ) चैनं(६) शुतुद्र्या(७)(ङ) च विपाट्(च) सह!
यौ च देवौ शुनासीरौ(छ)(८) तौ चाग्नी चैतदाश्रयौ(९) ॥११३॥
लोके वै(१०) यच्च वै प्रातः सवनं(ज) क्रियते मखे(झ)।
वसन्त(ञ)शरदौ(ट) चर्तू स्तोमो(ठ)ऽनुष्टुवथो(ड) त्रिवृत्(ढ)(११) ॥११४॥

---

(१) चैवमिति ख०, भजेते चैतमिति क० घ०, भजेते चैनमिति ङ०।
(२) एवार्व्वी(ण) इति क० ग० घ०।
(३) तु गेदृशा इति ख०।
(४) एवेति क० घ०।
(५) जोष्ट्रा इति ख०।
(६) चोर्जाञ्जतिश्चैनमिति ख०, एवेति क० घ०।
(७) सुतुरुद्रा इति ख०।
(८) सुनासीरौ इति ख०।
(९) चैवाथैतदाश्रयौ इति क० घ०, चाग्नि चैतदास्तथेति ख०।
(१०) लोकोऽयमिति क०ग० घ० ङ०।
(११) च यस्त्रिवृत् इति क० घ०।

(क) ऋ० १, १४, ९। (ख) ऋ० १, १६७, ५। (ग) ऋ० १, २८, ६। (घ) ऋ० ८, ३९, ४। (ङ) ऋ० ३, ३३, १। (च) ऋ० ३, ३३, १। (छ) ऋ० ४, ५७, ५। (ज) ऋ० १, १६, ५। (झ) ऋ० १, ६, ८। (ञ) ऋ० १०, ९०, ६। (ट) ऋ० १, ७२, ३। (ठ) ऋ० १, ८, १०। (ड) ऋ० १, २८, ६। (ढ) ऋ० १, १४०, २। (ण) ऋ० ६, ७५, ४।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

गायत्री[क] चैकविंशश्च यच्च साम[ख]रथन्तरम्[१][ग]।
साध्याः[घ] साम च वैराजमाप्त्य[ङ]श्च वसुभिः[च][२] सह ॥११५॥
इन्द्रेण च मरुद्भिश्च सोमेन वरुणेन च।
पर्ज्जन्येनर्त्तुभिश्चैव विष्णुना चास्य संस्तवः ॥११६॥
अस्यैवाग्नेस्तु पूष्णा च[३] साम्राज्यं वरुणेन च।
देवता वाहनञ्चैव[४] हविषां[५] वहनं तथा ॥११७॥
देवतामर्थतत्त्वज्ञो मन्त्रैः संस्कृयते[६]हविः[७]।
असन्ततस्या[८]पि सतो[९] हविरेकं[१०] निरूप्यते ॥११८॥
कर्म दृष्टे च[११] यत् किञ्चिद्[१२] विषये[१३] परिवर्त्तते।

---

(१) साध्यं रथन्तरमिति ख०।
(२) आप्त्यश्चवसुभिरिति ख०, आप्त्याश्च वसुभिरिति ग० घ० ङ०।
(३) पुंश्चेति ख०, पुंसा चेति ङ० पुस्तकान्तरञ्च॥
(४) अपि इति क० घ०।
(५) हविषः इति क० घ०।
(६) संयोजयेदिति क० घ०।
(७) विदुरिति ख०।
(८) असंस्कृतस्येति क० घ०।
(९) विततः इति घ०।
(१०) एषा इति ख०, एवमिति ग०।
(११) तु इति क० घ०, कर्म्म दृष्टेष्विति ङ० पुस्तकान्तरञ्च।
(१२) यः कश्चिदिति क० घ०।
(१३) विकथे इति ख०, विशये इति ङ०।

(क) ऋ० १०, १४, १६। (ख) ऋ० १,६२,२। (ग) ऋ० १०,१८१,१।
(घ) ऋ० १, १६४,५०। (ङ) ऋ० १, १०५, ९। (च) ऋ० १, ५८, ३।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

इत्युक्तोऽयं गणः सर्वः पृथिव्यग्न्याश्रयो महान् ॥११९॥
यश्चेन्द्रो[१] मध्यमस्थानो गणः सोऽयमतः परः।
विमानानि च दिव्यानि गन्धर्वाप्सरसां[२]तथा ॥१२०॥
इन्द्राश्रयस्तु[३] पर्ज्जन्यो रुद्रो वायुर्बृहस्पतिः।
वरुणः कश्च मृत्युश्च देवश्च ब्रह्मणस्पतिः[क] ॥१२१॥
मन्यु[४]श्च विश्वकर्मा च मित्रः क्षेत्रपति[५]र्यमः।
तार्क्ष्यो वास्तोष्पतिश्चैव सरस्वांश्चैवमत्र ह[६] ॥१२२॥
अपानपाद्धिक्रा[ख]श्च[७] सुपर्णो[ग]ऽथ पुरूरवाः[घ]।
ऋतो[ङ]ऽसुनीति[च]र्वैन[छ]श्च[८] तथेन्दुश्च स्त्रियो दितिः[ज][९] ॥१२३॥

---

(१) त्वैन्द्रः इति क० घ०।
(२) गन्धर्वाप्सरसः इति क० घ०, गणश्चाप्सरसामिति ग० ङ० पुस्तकान्तरञ्च।
(३) इन्द्राश्च यस्तु इति क० घ०।
(४) मनुरिति ख० ङ०।
(५) मित्रक्षेत्रपतिरिति ख० ग०।
(६) तत्र तु इति क० घ०।
(७) अपान्नपाद्धिक्रा चेति क० घ० ङ०, अपान्नपादधिकाश्चेति ग०।
(८) वैनश्चेति घ०।
(९) तस्यैतस्याश्रये दिति इति क० घ०, तद्यदुश्च स्त्रियो दितिरिति ङ० पुस्तकान्तरञ्च।

(क) ऋ० २, २४, २। (ख) ऋ० ४, ३८, ९। (ग) ऋ० १, ३५, ७। (घ) ऋ० १, ३१, ४। (ङ) ऋ० ८, ६०, ५। (च) ऋ० १०, १२, ४। (छ) ऋ० १, ८३, ५। (ज) ऋ० ७, १५, १२।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

त्वष्टा[क] च सविता चैव वातो[ख][१]वाचस्पतिस्तथा ।
धाता प्रजापतिश्चैव अथर्वाण[ग]श्च[२] ये स्मृताः ॥१२४॥
भृगव[घ]श्चैवमग्निश्च[३] तथेला[ङ] चैव याः स्मृताः ।
विधातेन्दुरहिर्बुध्न्यः [च]सोमोऽहिरथ चन्द्रमाः ॥१२५॥
विश्वानर[छ]श्च वै[४]देव ऋभूणां[ज] संस्तुतो[५] गणः ॥१२६॥
मरुतोऽङ्गिरसश्चैव पितरश्चर्तुभिः सह ।
राका[झ][६]वाक्[ञ]सरमा[ट]ष्ट्या[ठ]श्च[७]भृगवो[ड]ऽष्ट्या सरस्वती॥१२७॥
यम्यु[८]र्वशी[ढ]सिनीवाली[ण] पथ्या[त] स्वस्ति[थ]रुषाः कुहूः ।

---

(१) वाचः इति क० घ० ।
(२) वाथर्व्वाणश्चेति ख० ।
(३) श्येनश्चैवैवमापश्चेति ख० घ० ।
(४) चैवेति ख० पुस्तकान्तरञ्च ।
(५) रुद्राणां चाश्रितः इति क० घ० ।
(६) एका इति क० ।
(७) वाक्सरमाश्चेति ङ० ।
(८) यम्युरिति ख० ।

(क) ऋ० १, ३२, २ । (ख) ऋ० १, २८, ६ । (ग) ऋ० ९, ११, २ । (घ) ऋ० १, ५८, ६ । (ङ) ऋ० १, १३, ९ । (च) ऋ० १, १८६, ५ । (छ) ऋ० १, १८६, १ । (ज) ऋ० ४, ३५, २ । (झ) ऋ० २, ३२, ८ । (ञ) ऋ० १, १६४, ४५ । (ट) ऋ० १, ६२, ३ । (ठ) ऋ० १, १०५, ९ । (ड) ऋ० १, ५८, ६ । (ढ) ऋ० १, १०१, ४ । (ण) ऋ० २, ३२, ८ । (त) ऋ० ३, ५४, ५ । (थ) ऋ० ३, ८९, ६ ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पृथिव्यनुमतिर्धेनुः सीते[क]ला[ख]ख्या तथैव[१] गौः ।
गौरी[ग] च रोदसी[घ] चैव इन्द्राण्या[२]श्चैष वै पतिः ॥१२८॥
छन्दस्त्रिष्टुप् च पङ्क्ति[ङ]श्च लोकानां मध्यमश्च यः ।
एतेष्वेवाश्रयो[३]विद्यात्सवनं[च] मध्यमञ्च यत् ॥१२९॥
ऋतू च ग्रीष्महेमन्तौ यच्च सामोच्यते[४] बृहत् ।
शक्करीषु[छ] च यद्गीतं नाम्ना तत्साम शाक्करम् ॥१३०॥

इति बृहद्देवतायां प्रथमोऽध्यायः ।

---

(१) श्रीर्लाक्षेला दितिश्चेति क० घ०, सीतालाक्षा तथैवेति ख० ग० ।
(२) चैवैन्द्रायण्याः इति ख० ।
(३) एकस्यैवाश्रयः इति क० घ०, आश्रये इति ख० पुस्तकान्तरञ्च ।
(४) साभ्योच्यते इति ख० ।

(क) ऋ० ४, ५७, ७ । (ख) ऋ० १, १२८, ७ । (ग) ऋ० ९,१२,३ । (घ) ऋ० १, १६७,५ । (ङ) ऋ० १०, ११७, ८ । (च) ऋ० १, १६, ५ । (छ) ऋ० ७, ३३, ४ ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अथ द्वितीयोऽध्यायः।

आह चास्यैव तौ[१]स्तोमा[क]वाश्रयौ शाकटायनः[२]।
यश्च[३] पञ्चदशो नाम्ना सङ्ख्यया[४] त्रिणवश्च[५] यः ॥१॥
संस्तुत[६]श्चैव पूष्णा च विष्णुना वरुणेन च।
सोमवाय्वग्निकुत्सैश्च ब्रह्मणस्पतिनैव च ॥२॥
बृहस्पतिना च तथा[७] बृहत[ख]श्चैष वै पतिः[८]।
कासुचित्[९] केचिदित्याङ्गर्निपाताः[ग] स्तुतिषु स्तुताः[१०] ॥३॥

---

(१) द्वौ इति ख० ग० ङ०।
(२) भाकटायनः इति क० घ०।
(३) यस्येति ख०।
(४) सङ्ख्यायामिति क० घ०।
(५) त्रिनवः इति दन्त्यनकारयुक्तपाठो विशुद्धः।
(६) संस्कृतः इति क० घ०।
(७) स बृहस्पतिना चैव इति ख०, बृहतस्पतिना चैवेति ग० ङ०।
(८) नाम्ना यश्चापि पर्व्वतः(घ) इति ख० ग० ङ० पुस्तकान्तरञ्च।
(९) कश्चित्स इति क० घ०।
(१०) निपातः स्तुतिषु स्तुतः इति क० घ०।

(क) ऋ० १, ८, १०। (ख) ऋ० १, १३०, ९। (ग) ऋ० ४,५५,३। (घ) ऋ० १, ३७, ७।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

मित्र[क]श्च[१] स्तूयते[२]देवो वरुणेन महाः[३][ख]सकृत् ।
रुद्रेण सोमः पूष्णा[४] च पुनः पूषा च वायुना ॥४॥
वातेनैव तु[५] पर्जन्यो लक्ष्यते वै क्वचित्[६] क्वचित् ।
ऋच[ग]र्द्धर्चेषु[७] पादेषु सूक्तेष्वेषु तु[८] कृत्स्नशः ॥५॥
रसादानं[९] तु कर्मास्य वृत्रस्य[१०][घ] च निवर्हणं ।
स्तुतेः प्रभुत्वं सर्वस्य बलस्य[ङ] निखिला कृतिः ॥६॥
इत्यैन्द्रो मध्यमस्थानो गणः सम्यगुदाहृतः ।
यः परस्तु[११]गणः सौर्य्यो द्युस्थानस्तं निबोधत ॥७॥

---

(१) तु इति ख० ङ० पुस्तकान्तरञ्च ।
(२) श्रूयते इति ग० ङ० पुस्तकान्तरञ्च ।
(३) सर्व्वेषु आदर्शपुस्तकेषु, सहा इति निर्व्विसर्गपाठो वर्त्तते ।
(४) पूषा इति ख० ।
(५) चैव इति ख० ङ० । चेति ग० ।
(६) अन्यत्र वै इति ग० ङ० पुस्तकान्तरञ्च ।
(७) अर्धर्चेष्वृचु इति क० घ०, ऋचवर्द्धेषु इति ख०, ऋचवर्द्धर्चेषु इति ग० ।
(८) सूक्तेष्वेव त्विति क० घ०, सूक्तेष्वेतेषु इति पुस्तकान्तरं ।
(९) रसदानमिति क० घ० ।
(१०) पुत्रस्येति क० घ० ।
(११) यस्य यस्तु इति क० ।

(क) ऋ० १, २३, ६ । (ख) ऋ० ८, २०, २० । (ग) ऋ० ५,५६,३ । (घ) ऋ० १, ३२, १० । (ङ) ऋ० १, ३७, १२ ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तस्य मुख्यतमौ देवावश्विनौ[१] सूर्य्यमाश्रितौ ।
वृषाकपायि[२](क) सूर्य्यो[ख]षाः[ग] सूर्य्यस्यैव तु पत्नयः[३] ॥८॥
अमुतोर्वाङ्[४] निवर्त्तन्ते प्रतिलोमास्तदाश्रयाः[५] ।
पुरोदया[६]त्तामुषसं सूर्य्यां मध्यन्दिने स्थिते ॥९॥
वृषाकपायिं[२] सूर्य्यास्तकाल आङः[७] स्तुतिष्वृचि[८] ।
तस्या[९]अये[१०]सरण्यूश्च[घ][११] भगः[ङ] पूषा वृषाकपिः[च][१२] ॥१०॥

---

(१) त्वश्विनौ इति क० घ० ।
(२) सर्व्वेषु आदर्शपुस्तकेषु वृषाकपायी इति दीर्घस्वरान्तपाठो वर्त्तते ।
(३) पत्नय इति क०, यत्नतः इति ख० ।
(४) अमुतोर्वागिति ङ० पुस्तकान्तरञ्च । अमुतो वागितिपाठः शुद्धः ।
(५) फलोदये इति क० घ० ।
(६) पुरोदये इति क० घ० ।
(७) सूर्य्यस्य तामेवाङरिति क० घ०, सूर्य्यस्य स्तानेवाङरिति ख० ।
(८) तु निम्रुचि इति क०, निमुचि इति ख० ।
(९) अस्येति क० घ० ।
(१०) आश्रमे इति ग० ।
(११) तसापुश्चेति ख० ।
(१२) बृहस्पतिरिति ख० ।

(क) ऋ० १०, ८६, १३ । (ख) ऋ० ५, ७३, ५ । (ग) ऋ० १, ४६, १ ।
(घ) ऋ० १०, १७, २ । (ङ) ऋ० १, २४, ४ । (च) ऋ० १०, ८६, १ ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यमो वैश्वानरो[क] विष्णुर्वरुणश्चैकपादजः[१] ।
पृथिवी च समुद्राश्च देवाः सप्तर्षयश्च ये ॥ १ १॥
आदित्याः केशिसाध्याश्च सविता[२] वसुभिर्मनुः ।
दध्यङ्ङ्[ख]थर्वा[ग] विश्वे[घ] च वाजिनो[ङ][३]देवपत्नयः ॥ १ २॥
असौ तृतीयं सवनं[४] लोकः साम च[५] रैवतं ।
वैरूपश्चैव वर्षाश्च[६] शिशिरोऽथ ऋतुस्तथा[७] ॥ १ ३॥
त्रयस्त्रिंशश्च[८]यः स्तोमः[च][९] कृष्णा सप्तदशश्च यः ।
छन्दश्च जगतीनाम्ना[१०] तथाऽतिच्छन्दसश्च[११]याः[१२] ॥ १ ४॥

---

(१) अथ पादजः इति क० घ० ।
(२) आदित्यपूगः साध्याश्च सार्द्धश्चेति क० घ० ।
(३) वाजिनौ इति ख० ।
(४) तृतीयसवनमिति क० घ० ।
(५) तृतीयः सर्व्वेन लोमसामा चेति ख० ।
(६) वैरूप्यश्चैव मर्षाश्चेति ख० ।
(७) शिशिरश्चैव यातृतू इति क० घ० ।
(८) त्रयस्त्रियश्चेति ख० ।
(९) यत् स्तोमं इति क० घ० ।
(१०) चैवेति क० घ० ।
(११) अतिश्छन्दसाश्चेति ग०, अतिच्छन्दसाश्चेति क० ख० घ० ।
(१२) यदिति क० घ० ।

(क) ऋ० १, ५९, ६ । (ख) ऋ० १, ८०, १६ । (ग) ऋ० १, ८०, १६ । (घ) ऋ० १, ३, ७-९ । (ङ) ऋ० १, ११, २ । (च) ऋ० १, ८, १० ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पौरुषञ्चाऊरस्यैतत्सर्वमेव तु[१] पौरुषं ।
एतस्यैव तु विज्ञेया देवाः संस्तविका[२]स्त्रयः[३] ॥१५॥
चन्द्रमाश्चैव वायुश्च पञ्चमं वत्सरं[४] विदुः ।
केचित्तु निर्वपत्य[५]स्य सौर्य्यं वैश्वानरं हविः ॥१६॥
सौर्य्यवैश्वानरीयं हि तत् सूक्तमिव[६]दृश्यते ।
ऋगर्द्धर्चोऽथ[७]वा पादो दृचो वा यदि वा दृचः ॥१७॥
अनेन तु प्रवादेन[८] दृष्टा मूर्द्धन्यतास्तुतिः ।
सूर्य्यवैश्वानराग्नीना[९] मैकात्म्यमिह दृश्यते ॥१८॥
हरणं तु रसस्यैतत्कर्मणाऽमुत्र[१०]रश्मिभिः ।
यानीमानि च पश्यन्ति सर्वभूतानि तेजसा[११] ॥१९॥

---

(१) हेति ख० ।
(२) संस्तापिकाः इति क० घ० ।
(३) तये इति ख० ।
(४) यच्च संवत्सरमिति क० घ०, पञ्चसंवत्सरमिति ख० ।
(५) निर्व्वपते चेति क० घ० ।
(६) न सूक्तमिहेति क० घ० ।
(७) ऋगर्द्धर्चश्चेति क० घ०, ऋग्वर्द्धर्चाथेति ख० ।
(८) प्रयोगेणेति क० घ०, प्रपादेनेति ख० ।
(९) सौर्य्यवैश्वानराग्नीनामिति क० ख० घ० पुस्तकान्तरञ्च ।
(१०) रश्मिभिश्चास्य कर्म्माऽमुत्र चेति ग० ङ० पुस्तकान्तरञ्च ।
(११) येन नातिविजानन्ति सूर्य्यभूतानि चक्षुषेति ख० ग० ङ० पुस्तकान्तरञ्च ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

विभागमिममेतेषां विभूतिस्थानसम्भवं ।
सम्यग्विज्ञाय[१]मन्त्रेषु तन्तु[२]कर्मसु योजयेत् ॥२०॥
अध्यापयन्नधीयानो मन्त्र[३]श्चैवानुकीर्तयन् ।
स्थानं सालोक्यं सायुज्यमेतेषामधिगच्छति[४] ॥२१॥
अग्नेस्तु यानि सूक्तानि[५] पञ्च नामानि कारवः[क] ।
षड्विंशतिस्तथेन्द्रस्य प्राङ्ः सूर्यस्य सप्त च ॥२२॥
तेषां पृथङ्निर्वचनमेकैकस्येह कर्म्मजं ।
उच्यमानं यथान्यायं शृणुध्वमखिलं मया ॥२३॥
जातो यदग्रे भूतानामग्रणीरध्वरे च यत् ।
नाम्ना सन्नयते वाङ्गं[६] स्तुतोऽग्निरिति[७]सूरिभिः[ख] ॥२४॥
द्रविणं[ग] धनं बलं वापि प्रायच्छद्येन[८] कर्मणा ।

---

(१) विजानन्निति क० घ० ।
(२) तांश्चेति क० घ० ।
(३) सत्सु इति क० घ० ।
(४) एव गच्छतीति ख० ग० ङ० पुस्तकान्तरञ्च ।
(५) सूक्तेषु इति क० घ० ।
(६) सन्तिष्ठते चाग्रे इति क० घ० ।
(७) इहेति क० घ० ।
(८) चैव प्रयच्छेद्येनेति क० घ० ।

(क) ऋ० १, ११, ६ । (ख) ऋ० १,५१,१५ । (ग) ऋ० १,९४,१४ ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तत्कर्म दृष्ट्वा[१]कुत्स[क]स्तु प्राहैनं द्रविणोदसं[ख] ॥२५॥
अयं तनूनपाद[ग]ग्निरसौ हि तननात्तनुः[२][घ]।
ततस्तु मध्यमो जज्ञे स्थानेऽयं[३] मध्यमात्ततः[४] ॥२६॥
अनन्तरं[५] प्रजामाङ्गर्नपा[ङ]दिति कृपण्यवः।
नपादमुष्य[६]चैवायमग्निस्तेन तनूतपात् ॥२७॥
पृथक्तेन समत्वेन[७] यज्ञे यच्छास्यते[८] नृभिः।
स्तुवन्त्याप्रीषु तेनेमं नराशंस[च]न्तु कारवः[९][छ] ॥२८॥
पुनाति[१०] यदिदं विश्वमेवाग्निः[११] पार्थिवोऽथ च[१२]।

---

(१) कृत्वेति क० घ०।
(२) तपसा तनूरिति क० घ०।
(३) स्थानेऽयमिति ख०।
(४) जज्ञे यश्चैव मध्यमादिति क० घ०।
(५) अनन्तराभिति ङ० पुस्तकान्तरञ्च।
(६) अमुष्येति ख०।
(७) समासैस्त्विति ख० ग० ङ० पुस्तकान्तरञ्च।
(८) वास्यते इति क० ख०।
(९) सूरयः इति क० घ०।
(१०) जानाति इति ख०।
(११) विश्वमेघाग्निरिति ख०।
(१२) पार्थिवोऽप्यचेति ख०।

(क) ऋ० १, १०६, ६। (ख) ऋ० ९, ८८, ३। (ग) १, १८८, २। (घ) ऋ० १, १२०, ११। (ङ) ऋ० १, १४३, १। (च) ऋ० १, १३, ३। (छ) ऋ० १, ११, ६।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

वैखानसर्षिभि[१] स्तेन पवमान[क] इति स्तुतः[२] ॥२९॥
भूतानि वेदयज्जातो जातवेदाऽथ[ख]कथ्यते[३] ।
यद्वैष[४]जातविद्यो[५]ऽभूद्वित्त्वा[६]जातोऽधिवेत्ति[७] वा ॥३०॥
विद्यते सर्वभूतैर्हि[८] यद्वा जातः[९] पुनः पुनः ।
तेनैष मध्यभागिन्द्रो[ग][१०] जातवेदा इति स्तुतः ॥३१॥
पुनाति यदिदं विश्वं ह्येषोऽग्निः[घ] पार्थिवोऽप्सु सन् ।
वैखानसाश्रितैस्तस्मात्पवमान इति स्तुतः[११] ॥३२॥

---

(१) वैखानस ऋषिरिति ख० ।
(२) पुनातीत्यादि पवमान इति स्तुतः इत्यन्तपाठः क० घ० पुस्तकयोर्नास्ति ।
(३) जातैर्यद्वाऽथ विद्यते इति क० घ० ।
(४) यद्वैष इति क० घ० ।
(५) जातं वेदः इति क० घ० पुस्तकान्तरेषु ।
(६) वित्तमिति ख० ग० ङ० ।
(७) अथ वेत्तीति क० घ० ।
(८) सर्व्वमेतर्हीति क० घ० ।
(९) जातामिति क० घ० ।
(१०) मध्यभागेन्द्र इति ख० ग० ।
(११) एष श्लोकः ख० ग० ङ० पुस्तकेषु पुस्तकान्तरे च न विद्यते ।

(क) ऋ० ८, १०१, १४ । (ख) ऋ० १, ७७, ५ । (ग) ऋ० १, २, ५ । (घ) ऋ० १, १, २ ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अणिष्ठ एष(१) यत्तु त्रीन्(२)व्याप्यैको व्योम्नि तिष्ठति ।
तेनैनमृषयोऽर्चन्तः(३) कर्मणा वायु(क)मब्रुवन् ॥ ३ ३॥
त्रीणीमान्यावृणोत्येको(४)मूर्त्तेन तु रसेन यत् ।
तयैनं वरुणं(ख) शक्त्या स्तुतिभ्याङ्गः क्षपण्यवः(५) ॥ ३ ४॥
अरोदीद(६)न्तरिक्षे यद्विद्युद्वृष्टिं ददन्नृणां(७) ।
चतुर्भिर्ऋषिभिस्तेन रुद्र(ग) इत्यभिसंस्तुतः(८) ॥ ३ ५॥
चतुर्विधानां भूतानां प्राणो भूत्वा व्यवस्थितः ।
दृष्टे चैवास्य सर्व्वस्य तेनेन्द्र इति स स्मृतः(९) ॥ ३ ६॥
दूरां(घ) दृणाति(१०) यत्काले मरुद्भिः सहितोऽम्बरे ।

---

(१) अनिष्ठयैवेति क० घ० ।
(२) यत्तन्वा इति क०, यन्तु त्रीनिति ख० ङ०, यन्तन्वा इति घ० ।
(३) अर्चन्ते इति ख० ग० ङ० पुस्तकान्तरञ्च ।
(४) त्रीनिमानावृणोत्लोकानिति क० घ० ।
(५) तु कारवः इति क० घ० ।
(६) रोरूयन्निति क० घ० ।
(७) विद्युद्वृष्टिरदान्नृणामिति क० घ० ।
(८) अभिधीयते इति क० घ० ।
(९) एष श्लोकः क० घ० पुस्तकयोर्नास्ति ।
(१०) इरा ददातीति क० घ० ।

(क) ऋ० ५, ४१, ६। (ख) ऋ० १, २, ७। (ग) ऋ० १, ४३, ३। (घ) ऋ० ५, ८३, ४।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

रवेण महता युक्तस्तेनेन्द्रमृषयोऽब्रुवन् ॥ ३७॥
यदिमां प्रार्जयत्ये(१)को रसेनाम्बरजेन गां ।
कालेऽत्रिरौर्वश्चर्षी(२)तेन पर्जन्य(क)माहतुः ॥ ३८॥
तर्पयत्येष यल्लोकान् जन्यो जनहितञ्च यत् ।
परो(३)जेता जनयिता यद्वात्रेयस्तुतो(४)जगौ(५) ॥ ३९॥
बृहन्तौ पाति यल्लोकावेष द्वौ मध्यमोत्तमौ ।
बृहता(६)कर्म्मणा तेन(७) बृहस्पति(ख) रितीडितः(८) ॥ ४०॥
ब्रह्म वाक् ब्रह्म सत्यञ्च ब्रह्म सर्व्वमिदं जगत् ।
पातारं ब्रह्मणस्तेन शौनहोत्रः स्तुवन् जगौ ॥ ४१॥
चपां(ग)(९) क्षितिभ्यो विदधद्यदृतुष्वविशत् क्षितौ(१०) ।

---

(१) व्राजयतीति क० घ० ।
(२) चार्षी इति क० घ० ।
(३) पुरः इति ख० ।
(४) आत्रेयस्तत इति ख० ग० ।
(५) एष श्लोकः क० घ० पुस्तकयोर्न दृश्यते ।
(६) बृहन्तीति ख० ।
(७) चैवेति क० घ० ।
(८) बृहतश्चैष वै पतिरिति क० घ० ।
(९) अन्तमिति ग० ।
(१०) ब्रह्मवागित्यादि अविशत् क्षितौ इत्यन्तपाठः क० घ० पुस्तकयोर्नेच्छ्यते ।

(क) ऋ० ५, ५३, ६ । (ख) ऋ० १, ६२, ३ । (ग) ऋ० ३, ४९, ४ ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

ददाति यदि सङ्क्षेत्रे त्वृतावम्बरजं पुनः[१] ।
तेनैनमाह चेत्रस्य वामदेवः[क][२]स्तुवन् पतिं ॥४२॥
मनसेमन्तु यं दृश्यं[३] मध्यमं लोकमाश्रितं ।
शंसत्[ख] सत्येन सत्ये[ग] वै स[४] एष स्तुतवानृतं[५][घ] ॥४३॥
रवेणान्तरसैः चिप्तैः[६]स्थितो व्योम्न्येष मायया ।
ऋतस्य श्लोक[ङ] इत्येष पुनश्चैनं ततोऽब्रवीत् ॥४४॥
वास्तु[च] प्रयच्छंल्लोकस्य मध्यमस्य तु पाति यत्[७] ।
तेन वास्तोष्पतिं प्राह चतुर्भिरिममौर्वशः ॥४५॥
वाचा वेदा ह्यधीयन्ते वाचा च्छन्दांसि तत्र ह ।
अथो[छ] वाक् सर्व्वमेवेदं तेन वाचस्पतिः स्तुतः[८] ॥४६॥

---

(१) एतच्छ्लोकार्द्धं ग० ङ० पुस्तकयोर्न विद्यते ।
(२) पाकादेवेति क० घ० ।
(३) मनसेममिमं दृश्यमिति क० घ०, मनसेयं वुभादृश्यमिति ख०, मनसोमन्तु यद्दृश्यमिति ग० ।
(४) य इति ङ० पुस्तकान्तरञ्च ।
(५) ऋषिरिति क० घ० ।
(६) रसं क्षितौ रवेणर्त्तौ इति क० घ० ।
(७) पातितः इति क० घ० ।
(८) वाचा वेदा ह्यधीयन्ते इत्यादि तेन वाचस्पतिः स्तुत इत्यन्तं क० घ०, पुस्तकयोर्न विद्यते ।

(क) ऋ० ४, १६, १८। (ख) ऋ० ६, २३, ५। (ग) ऋ० ९, १०९, ६।
(घ) ऋ० १, ४१, ४। (ङ) ऋ० १, १९०, ४। (च) ऋ० ८, १५, ५।
(छ) ऋ० १, २८, ६।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

न कुत[१]श्चैव[२] यद्दीनो वृत्वा[क] तिष्ठति मध्यमः ।
राहूगण ऋषिस्तेन प्राहैनं गौतमो[३] दितिं[ख] ॥४७॥
प्रजाभ्यस्त्वेष यच्छक्र एष वीरः शिवः सुखः[४] ।
हिरण्यगर्भ[ग] स्तेनैनमृषिरर्चतु[५]वाचकम् ॥४८॥
इह प्रजाः प्रयच्छेति[६] सङ्गृहीता[७] प्रयाति[८] च ।
ऋषिर्विवस्वतः पुत्त्रं तेनाहैनं पुन[९] र्यमं[घ] ॥४९॥
मित्रीकृत्य जना विश्वे यदिमं[१०] पर्य्युपासते ।
मित्र[ङ] इत्याह तेनैनं विश्वामित्रः[च] स्तुवन् स्वयम् ॥५०॥
निदाघमासातिगमे यदृते नावति क्षितिम्[११] ।

---

(१) नकुनः इति ख०, न ऊतः इति ङ० ।
(२) एष इति क० घ० ।
(३) गोतम इति क० घ० ।
(४) प्रजाभ्यस्त्वेष यच्छर्म्मकमिच्छन्मनसा सखम् इति ख० ग० ।
(५) एव त्विति ख०, इच्छन्नु इति ग० ङ० पुस्तकान्तरञ्च ।
(६) प्रयच्छन् स इति ख० ग०, नियच्छद्भिरिति क० घ० ।
(७) सङ्गृहीत्वेति ग० ङ०, पुस्तकान्तरञ्च ।
(८) सङ्गृहीताह पानि इति घ० ।
(९) यमः इति क० घ० ।
(१०) मैत्रं कृत्वैर्जना विश्वे यदेते इति क० घ०, यदिमे इति ख० ।
(११) यदि सेनाववीक्षितमिति क० घ०, यदतेना च निक्षति इति ख० ।

(क) ऋ० १०, ९०, १ । (ख) ऋ० ४, २, ११ । (ग) ऋ० १०, १२१, १ ।
(घ) ऋ० १, ७३, १० । (ङ) ऋ० १, २३, ६ । (च) ऋ० ३, ५२, ९ ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

विश्वस्य जनयन् कर्म्म विश्वकर्म्मै(क)ष तेन सः(१) ॥५ १॥
सरांसि घृतवन्त्यस्य सन्ति लोकेषु यत्तिषु ।
सरस्वन्त(ख)मिति प्राह वाचं प्राज्ञः सरस्वतीम्(ग)(२) ॥५ २॥
प्राणभूतस्तु भूतेषु यद्वितत्येह(३) तिष्ठति ।
तेनैनं वेन(घ)माहर्षिर्वेनो(ङ)नामेह(४) भार्गवः ॥५ ३॥
ससृजे मासि मास्येनमभिमत्य(५)ततो व्रजन्(६) ।
तेनैनं मन्यु(च)रित्याह मन्युरेव तु तापसः ॥५ ४॥
यदन्तकाले भूतानामेक(७) एव नयत्यसून् ।
तेनासुनीति(छ)रुक्तोऽयं स्तुवता श्रुतबन्धुना ॥५ ५॥
निदाघमासातिगमे जन्म मध्ये भवत्यपां(८) ।
नप्तार(ज)माह तेनैनमृषिर्गृत्समदः(झ)स्तुवन्(९) ॥५ ६॥

---

(१) त्विति क० घ० ।
(२) इतीमन्तु ब्रूतो दीध्यनमौर्वशौ इति क० घ० ।
(३) यद्वेनत्येष्विति ग०, यद्वेनलेन्द्विति ङ० पुस्तकान्तरस्य ।
(४) आहार्चन् वेनोऽन्यमेहेति क० घ० ।
(५) अभिवत्येति ख०, अभिपत्येति ग० ।
(६) मासि मासीमामभितप्य तपोऽग्रजः इति क० घ० ।
(७) एष इति क० घ० ।
(८) मध्येऽस्य यत्त्वपामिति क० घ० ।
(९) त्वपामिति क० घ० ।

(क) ऋ० ८, ९८, २ । (ख) ऋ० १, १६४, ५२ । (ग) ऋ० ६, ६१, २ ।
(घ) ऋ० ९, २१, ५ । (ङ) ऋ० १, ८३, ५ । (च) ऋ० २,२४,१४ ।
(छ) ऋ० १०, १२, ४ । (ज) ऋ० २, ३५, १४ । (झ) ऋ० २,१९,८ ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अपा[१]मम्बरगर्भौघमादधत्[२]सोऽष्टमासिकम् ।
यत्क्रन्दत्य[३] सक्तन्मध्ये दधिक्रेति तदोच्यते[४] ॥ ५७ ॥
मासेन सम्भृतं गर्भं नवमेनाथ मासिकम्[५] ।
स्वयं क्रन्दन् दधात्युर्व्यां धातेत्यृग्भिः स[६] गीयते ॥ ५८ ॥
स्तीर्णेऽन्तरिक्षे क्षिपति यदा तूर्णं चरत्यसौ[७] ।
अरिष्टनेमिस्तार्क्ष्य[क]र्षिस्तार्क्ष्यं तेनैन[८]मुक्तवान् ॥ ५९ ॥
रुवन्[ख] व्योम्नुदयं याति क्रन्तन् भा[९]द्विसृजन्नपः ।
पुरूरवस[ग]माहैनं स्ववाक्येनोरु[घ]वासिनी[१०] ॥ ६० ॥

---

(१) वृष्ट्यामिति क० घ० ।
(२) आहरदिति क० घ० ।
(३) यत्क्रन्दते इति क० घ० ।
(४) दधिक्रास्तेन कथ्यते इति ख० ग० ङ० पुस्तकान्तरञ्च ।
(५) अष्टमासिकमिति क० घ० ।
(६) तु इति क० घ० ।
(७) तूर्णं क्षिपं वज्रसखा यद्विपातीह धन्विनीति क० घ०, तूर्णं क्षिप्रत्वज्रसखो यद्वियति पन्वतीति ख०, करोत्यसौ इति ङ० पुस्तकान्तरञ्च ।
(८) एवमिति ख० ग० ङ० पुस्तकान्तरञ्च ।
(९) क्रन्तभादिति ग० ।
(१०) स्ववाक्यैरुरुवाशिनीति क० घ० ।

(क) ऋ० १, ८९, ६ । (ख) ऋ० १, १७३, ९ । (ग) ऋ० १, ३१, ४ ।
(घ) ऋ० ११, १३, ७ ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यत्तु प्राच्या वयं नेति[१] घोषेण महता वतः[२]।
चेमं चितिभ्यो विदधदथर्त्तुष्वविशत् चितौ[३] ॥६१॥
तेन मृत्युमिमं सन्तं स्तौति मृत्युरिति स्वयं[४]।
नाम्ना सङ्कुसुको[५] नाम यमपुत्त्रो जघन्यजः[६] ॥६२॥
संवर्तयंस्तमः सूर्य्यो[७] दुषसञ्च प्रवर्तयन्।
दिवाकरः प्रसौत्येकः[८] सविता तेन कर्म्मणा ॥६३॥
उदितो भासयल्लोका[९] निमांश्चैष स्वरश्मिभिः[१०]।
स्वयं वसिष्ठस्तेनैनमृषिराह स्तुवन् भगम्[११][क] ॥६४॥

---

(१) नैतीति क० घ०।
(२) मधे इति क०, मतः इति ख०, मधमिति घ०।
(३) एतच्छ्लोकार्द्धं ग० ङ० पुस्तकयोर्नास्ति। चयश्चितिभ्यो विरजत् यत्तु+ष्वविश चितौ इति ख०, अविवश्चितौ इति क० घ०।
(४) इतीश्वरमिति क० घ०।
(५) सङ्कुसुमः इति क०।
(६) जघन्यसः इति ख०, जघन्यकः इति ङ०।
(७) स्वं वर्त्तयंस्तमो सूपौ इति क० घ०, संवर्त्तयं तमः सूर्य्यादिति ख० ग० ङ०।
(८) दिवा चरन् प्रसूत्यैकः इति क० घ०।
(९) भाति यल्लोकानिति क० घ०।
(१०) चैकस्य रश्मिभिरिति ख० ङ० पुस्तकान्तरञ्च।
(११) स्तुवन्नगमिति ग०।

(क) ऋ० १, १४, ३।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पुष्यन् चितिं[१] पोषयति प्रणुदन् रश्मिभिस्तमः[२] ।
तेनैनमस्तौत् पूषेति भरद्वाजस्तु पञ्चभिः ॥ ६५ ॥
त्रीणि भान्ति रजांस्यस्य यत्पदानि तु तेजसा[३] ।
तेन मेधातिथिः प्राह विष्णु[क]मेनं[४] त्रिविक्रमम् ॥ ६६ ॥
कृत्वा सायं पृथग्याति[५] भूतेभ्यस्तमसोऽत्यये ।
प्रकाशं किरणैः कुर्वंस्तेनैनं केशिनं[ख] विदुः ॥ ६७ ॥
सम्प्रत्येकैकशस्त्वेनं[६] यन्मन्यन्ते पृथङ्नराः ।
विश्वे[ग] विश्वानर[७][घ] स्तेन कर्मणा स्तुतिषु स्तुतः ॥ ६८ ॥
वृषे[ङ]व कपिलो[८][च] भूत्वा यन्नाकमधिरोहति ।
वृषाकपि[छ]रसौ तेन विश्वस्मादिन्द्र उत्तरः[ज] ।
रश्मिभिः कम्पयन्नेति वृषा वर्षिष्ठ[झ] एव सः ॥ ६९ ॥

---

(१) उद्यन् जगदिति क० घ० ।
(२) ततः इति ख० ।
(३) तेजसः इति क० घ० ।
(४) एतमिति क० ख० घ० ङ० ।
(५) सौर्य्यं पृथक् तेऽग्नी इति क० घ० ।
(६) मां प्रत्येकैकशस्त्वेवेति क० घ० ।
(७) वैश्वानरः (ञ) इति क० घ० ।
(८) वृषैष कपिल इति क० घ०, वृषैककपिल इति ख० ग० ।

(क) ऋ० ३, ५४, १४ । (ख) ऋ० १, १०, ३ । (ग) ऋ० १, ३, ७–९ । (घ) ऋ० १, १८६, १ । (ङ) ऋ० १, ५९, ६ । (च) ऋ० १, ७, ८ । (छ) ऋ० १०, २७, १६ । (ज) ऋ० १०, ८६, १ । (झ) ऋ० ४, १८, ९ । (ञ) ऋ० १, ३७, ६ ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सायाह्नकाले भूतानि स्वापयन्नस्तमेति यत्।
वृषाकपि[क]रितो[१] वा स्यादिति मन्त्रेषु दृश्यते ॥७०॥
त्रिषु धन्वे[ख]ति[२] हीन्द्रेण प्रत्युक्तो वारिषाकपे[३]।
विष्णातेर्विशतेर्वा स्याद्देवेष्टेर्व्याप्तिकर्म्मणः।
विष्णुर्निरुच्यते वातः सर्व्वं सर्व्वान्तरश्च सः[४] ॥ ७१ ॥
पञ्च षड्विंशतिश्चैव यानि नामानि सप्त च।
सम्यगग्नीन्द्रसूर्य्याणां तान्युक्तानि यथाक्रमम् ॥ ७२ ॥
नैपातिकानां नाम्नां तु प्रागुक्तैर्नामलक्षणैः।
सम्पन्नानां पृथक्त्वेन परिसङ्ख्या न विद्यते ॥ ७३ ॥
पार्थिवी[ग] मध्यमा[घ] दिव्या वागपि त्रिविधा तु या।
तस्याः सूक्तानि नामानि यथास्थानं निबोधत ॥ ७४ ॥
क्षत्त्वन्तु भजते सूक्तमेता[५]नद्यः स्तुता[६]भुवि।

---

(१) अतः इति पुस्तकान्तरं।
(२) धात्वेतीति ग० त्रिबुधन्वेतीति ङ०।
(३) वृषाकपे(ङ) इति ख०।
(४) रश्मिभिः कम्पयन्नेतीत्यादि सर्व्वं सर्व्वान्तरश्च स इत्यन्तपाठः क० घ० पुस्तकयोर्नेक्ष्यते।
(५) ह्येषा इति क० घ०, एषा इति ख० ग०।
(६) तदेति क० घ०।

(क) ऋ० १०, २७, १६। (ख) ऋ० १, ३८, ७। (ग) ऋ० ८, २५, ६। (घ) ऋ० ६, २५, १। (ङ) ऋ० १०, ८६, २०—२२।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यं वै वैनं[१] भजन्त्यापो[२] यदा[३] चौषधयः सदा[४] ॥ ७५ ॥
अरण्यानी[क] च रात्री[ख] च श्रद्धा[ग] चोषाः[५][घ] सरस्वती ।
पृथिवी चैव नामैषा भूत्वा[ङ]द्या च भजन्ति च[६] ॥ ७६ ॥
अग्नायी[च]नामतोऽप्येषा[७] भूत्वाग्नेयेषु[८] केषुचित् ।
स्तुता निपात[छ]मात्रेण तत्र तत्रेह दृश्यते ॥ ७७ ॥
मध्ये सत्यदिति[ज]र्वाक्च[९] भूत्वा चैषा सरस्वती ।
समग्रं भजते सूक्तं त्रिभिरेव तु नामभिः ॥ ७८ ॥
एषैव दुर्गा भूत्वर्चं[झ] कृत्वा[१०] स्यात् सूक्तभागिनी[११] ।

---

(१) यदा चैनमिति क० ख० घ०, पञ्च वैनमिति ग० ।
(२) भवन्त्यापः इति ख० ।
(३) तदेति क० घ० ।
(४) तथेति क० घ० ।
(५) चैषेति क० ख० घ० ।
(६) भूत्वा या भजते त्वृचीति क०, व्याभजते त्वृचीति घ० ।
(७) अग्नायीला च नामैषेति क० घ० ।
(८) भूत्वाग्नेयीष्विति क० घ० ।
(९) वाक्यमिति क० घ०, मध्यसत्यदितिर्वाक्चेति ख० ।
(१०) कृत्येति ङ० पुस्तकान्तरञ्च ।
(११) एषैव दुर्गा भूत्वर्चमिति श्लोकार्द्धं क० घ० पुस्तकयोर्न विद्यते ।

(क) ऋ० १०, १४६, ४। (ख) ऋ० १, ११३, १। (ग) ऋ० ७, ३२, १४ ।
(घ) ऋ० १, ४६, १ । (ङ) ऋ० १०, १६२, ५। (च) ऋ० ५, ४६, ८।
(छ) ऋ० ४, ५५, ३। (ज) ऋ० १, ४३, २। (झ) ऋ० ७, ६६, ११ ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तन्नामानि य(१) मिन्द्राणी सरमा(क)रोमशो(ख)र्व्वशी(ग) ॥७९॥
भवत्यथ्या(घ)सिनीवाली(२)(ङ) राका(च) चानुमतिः(३)(छ) कुहूः।
गौर्धेनुर्देवपत्न्योग्न्या(४) पथ्या स्वस्त्यथ(५) रोदसी।
नैपातिकानि ऋग्भाञ्जि(६) येषां नामानि कानिचित् ॥८०॥
यदा तु वाग्भवत्येषा(७) सूर्य्याऽसुं लोकमाश्रिता।
तदा सूक्तमुषा(८)(ज) भूत्वा सूर्य्या(झ) च भजतेऽखिलम् ॥८१॥
वृषाकपाय्यृचं(ञ) भूत्वा सरण्यू(ट)र्द्वे च ते ध्रुवम्(९)।

---

(१) सूक्तार्घानीयमिति क० घ०। सूक्तार्घागीयमितिपाठो विशुद्धः।
(२) ऋचस्त्वघ्न्या(ठ)सिनीवालीति क० घ०, भवस्त्वग्न्या सिनीवालीति ख०, भवत्यग्न्या सिनीवालीति ग०।
(३) राकोषानुमतिरिति क०, राकोषानुमितिरिति घ०, राका वानुमितिरिति पुस्तकान्तरम्।
(४) गोरीगौर्धेनुपत्न्योग्न्या इति क० घ०, देवपत्न्योग्ना इति ङ० पुस्तकान्तरञ्च।
(५) खस्ति चेति ख०, खस्तिश्चेति ग० ङ० पुस्तकान्तरञ्च।
(६) नैपातिकान् पृथग्भाञ्जीति क०।
(७) भजत्येषेति क० घ०।
(८) सूक्तमुखेति ख० ग०, तथा सूक्तमुषेति ङ० पुस्तकान्तरञ्च।
(९) त्वेव तदृचमिति क० घ०, ते ध्रुवमिति पुस्तकान्तरम्।

(क) ऋ० १, ६२, ३। (ख) ऋ० १, १२६, ७। (ग) ऋ० ५, ४१, १९।
(घ) ऋ० ३, ५४, ५। (ङ) ऋ० ११, ३२, ८। (च) ऋ० ११, ३२, ८।
(छ) ऋ० १०, ५९, ६। (ज) ऋ० १, १८१, ६। (झ) ४, ४४, १।
(ञ) ऋ० ७, ६६, ११। (ट) ऋ० १०, १७, २। (ठ) ऋ० ७, ८७, ४।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

निपातमात्रं भजते द्यविच्च[१] पृथिवी सती ॥ ८२ ॥
सूर्य्यामेव[२] सतीमेतां गौरीं वाचं सरस्वतीम् ।
पश्यामो वैश्वदेवेषु निपातेनैव केवलाः[३] ॥ ८३ ॥
घोषा[क] गोधा[ख] विश्ववारा[ग] पालोपनिषवन्निषत्[४] ।
ब्रह्मजाया[घ] जुहू[ङ]र्नामागस्त्यस्य[५][च] स्वसाऽदितिः[छ] ॥ ८४ ॥
इन्द्राणी चेन्द्रमाता[६] च सरमा[ज] रोमशो[झ]र्व्वशी[ञ] ।
लोपामुद्रा[ट] च नद्यश्च यमी[ठ] नारी च शाश्वती[७][ड] ॥ ८५ ॥
श्रीर्लक्ष्मीः सार्पराज्ञी[८] वाक् श्रद्धा मेधा च दक्षिणा ।
रात्री सूर्य्या[ढ] च सावित्री ब्रह्मवादिन्य ईरिताः ॥ ८६ ॥

---

(१) क्वचित्तु इति क० घ०, द्युवच्चेति ग० ।
(२) पृथिवी त्विति क० घ० ।
(३) केवलामिति क० घ० ।
(४) पालोपनिषन्निषत् इति क० ख० घ० ङ० ।
(५) छन्दोऽनुरोधात् नाम अगस्त्यस्येति पाठः समीचीनः ।
(६) चन्द्रमातेति ख० ।
(७) शश्वतीति क० घ०, तथैव चेति ख० ।
(८) सार्व्वराज्ञेति ख० ।

(क) ऋ० १०, ४०, ५ । (ख) ऋ० ८, ६९, ९ । (ग) ऋ० ३, ४, ३ ।
(घ) ऋ० १०, १०९, ३ । (ङ) ऋ० १, ५८, ४ । (च) १०, ६०, ६ ।
(छ) ऋ० १, ४३, २ । (ज) ऋ० १, ६२, ३ । (झ) ऋ० १, १२६, ७ ।
(ञ) ऋ० ५, ४२, १९ । (ट) ऋ० १, १७९, ४ । (ठ) ऋ० १०, १०, ९ ।
(ड) ८, १, ४३ । (ढ) ऋ० ४, ४४, १ ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

नवकः प्रथमस्त्वासां[१] वर्ग[२] स्तुष्टाव देवताः।
ऋषिभिर्देवताभिश्च समूदे[३]मध्यमो गणः॥ ८७॥
आत्मनो भाववृत्तानि जगौ वर्गस्तथोत्तमः।
उत्तमस्य तु वर्गस्य य ऋषिः सैव[४] देवता[५]॥ ८८॥
आत्मानमस्तौद्वर्गस्तु देवतां यस्तथोत्तमः[६]।
तस्मादात्मस्तवेषु स्याद्य ऋषिः सैव[७] देवता॥ ८९॥
संवादेष्वाह वाक्यं यः स तु तस्मिन् भवेदृषिः[८]।
यस्तेनोच्येत वाक्येन देवता तत्र[९] सा भवेत्॥ ९०॥
उच्चावचेषु चार्थेषु निपाताः समुदाहृताः।
कर्मोपग्रहणार्थं च[१०] क्वचिच्चौपम्यकारणात्॥ ९१॥
ऊनानां पूरणार्थावा[११] पादानामपरे क्वचित्।

---

(१) तासामिति ख०।
(२) वर्गाः इति क० घ०।
(३) समूहे इति क०, समुद्रे इति ख०।
(४) ऋषिश्चैव चेति घ०।
(५) आत्मनो भावृत्तानीत्यादि य ऋषिः सैव देवता इत्यन्तपाठः क० घ० पुस्तकयोर्न विद्यते।
(६) देवता चोत्तमस्तु यः इति क० घ०।
(७) आत्मस्तवेष्वेवं भवेदृषैवेति क० घ०।
(८) भवत्यृषिरिति क० घ०।
(९) तेष्विति क० घ०।
(१०) कर्म्मोपग्रहणार्थस्त्विति क० घ०।
(११) पूरणार्थन्त्विति क० घ०।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

मिताक्षरेषु ग्रन्थेषु पूरणार्थास्त्वनर्थकाः[१] ॥९२॥
कमीमिद्धिति[२]विज्ञेया ये त्वनेकार्थकाश्च ते[३] ।
इव न चित्तु चत्वार[४] उपमार्था भवन्त्यमी[५] ॥९३॥
उपमार्थं[६] नकारस्तु क्वचिदेव निपात्यते ।
मिताक्षरेषु ग्रन्थेषु प्रतिषेधस्त्वनेकशः[७] ॥९४॥
इयन्त[८] इति सङ्ख्यानं निपातानां न विद्यते ।
प्रयोजनवशा ह्येते[९] निपात्यन्ते पदे पदे ॥९५॥
उपसर्गास्तु विज्ञेयाः क्रियायोगेषु[१०] विंशतिः ।
विवेचयन्ति ते त्वर्थां[११]न्नामाख्यातविभक्तिभिः[१२] ॥९६॥

---

(१) पूरणार्थं त्वनर्थकाः इति क० घ० ।

(२) चामिमिद्वतीति ख० ।

(३) त्वन्ये सार्थकाः स्तुतौ इति क० घ० ।

(४) इवोनचिन्नुचत्वार इति ग० । इवेनचिन्नुचत्वार इति ङ० ।

(५) भवन्ति ते इति ख० ग० ङ० ।

(६) उपमार्थे इति ग० ङ० ।

(७) अनल्पशः इति ख० ग० ङ० ।

(८) इयन्तु इति ख० ।

(९) वशात् प्रकरणस्यैते इति ग० ङ० । वशाः प्रकरणस्यैते इति ख० ।

(१०) क्रियायोगेनेति ख० ग० ङ० ।

(११) ते त्वर्थमिति ग० ङ० । ह्यर्थानिति घ० ।

(१२) विभक्तितः इति घ० । विभक्तिषु इति ख० ग० ङ० ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

(१)(अनु(क)अ(ख)दन्त(ग)रित्येतानाचार्य्यः शाकटायनः ।
उपसर्गाः क्रियायोगान्मेने तेन त्रयोऽधिकाः ॥९७॥
त्रीण्येव लोके लिङ्गानि पुमान् स्त्र्यथ नपुंसकम् ।
नामसूक्तप्रयोगेषु वाच्यं प्रकरणं तथा ॥९८॥
तेषान्तु नामभिर्लिङ्गैर्ग्रहणं सर्वनामभिः ।
कृताकृतस्य सदृशो गृहीतस्य पुनर्ग्रहः ॥९९॥
पादसूक्तऋगर्धर्चनामान्यन्यानि यानि च ।
सर्वे नामानि चैवाऽऽरन्ये चैवं यथा कथा ॥१००॥
प्रधानमर्थः शब्दो हि तद्गुणायत्त दृश्यते ।
तस्मान्नानान्वयोपायः शब्दानर्थवशं नयेत् ॥१०१॥
अतिरिक्तं पदं त्याज्यं हीनं वाक्ये निवेशयेत् ।
विप्रकृष्टञ्च सन्दध्यादानुपूर्वीञ्च कल्पयेत् ॥१०२॥
लिङ्गं धातुं विभक्तिञ्च सन्नयेत् तत्र तत्र च ।
यद्यत्स्याच्छान्दसं वाक्यं कुर्य्यात् तत्तत्तु लौकिकम् ॥१०३॥
यावतामेव धातूनां लिङ्गं रूढ़िगतं भवेत् ।
अर्थश्चाप्यभिधेयञ्च तावल्लिंगुणविग्रहः ॥१०४॥
धातूपसर्गावयवगुणशब्दार्द्धधातुजम् ।
वक्तेकधातुजं वापि यदनिर्वाच्यलक्षणम् ॥१०५॥
धातुजं धातुजाज्जातं समस्तार्थजमेव वा ।

---

(१) ९६ सङ्ख्यकश्लोकात् १२७ सङ्ख्यकश्लोकपर्य्यन्तं श्लोकाः क० घ० चिह्नितयोः पुस्तकयोर्नोपलभ्यन्ते । एते ख० ग० ङ० चिह्नितेषु पुस्तकेषूपलभ्यन्ते ।

(क) ऋ० १, ६, ४ । (ख) ऋ० १, ५५, ५ । (ग) ऋ० १, ५४, १ ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

वाक्यजं व्यतिकीर्णञ्च निर्वाच्यं पञ्चधा पदम् ॥१०६॥
द्विगुर्द्वन्द्वोऽव्ययीभावः कर्मधारय एव च ।
पञ्चमस्तु बहुव्रीहिः षष्ठस्तत्पुरुषः स्मृतः ॥१०७॥
विग्रहानिर्वचः कार्यं समासेष्वपि तद्धिते ।
प्रविभज्यैव निब्रूयाद्दण्डार्हो दण्ड्य इत्यपि ॥१०८॥
भार्य्या रूपवती चास्य रूपवद्भार्य्य इत्यपि ।
इन्द्रश्च सोमश्चेत्येवमिन्द्रासोमौ निदर्शनम् ॥१०९॥
शब्दरूपं पदार्थश्च व्युत्पत्तिः सकृतिर्गुणः ।
सर्व्वमेतदनेकार्थं दशानवगमे गुणाः ॥११०॥
सामान्यवाचिनः शब्दा विशेषे स्थापिताः क्वचित् ।
पलायने यथावृत्ति कोनुमर्था इतीष्यते ॥१११॥
विशेषवाचिनस्त्वन्ये सामान्ये स्थापिताः क्वचित् ।
हिमेनाग्निमिति मन्त्रे हिमशब्दो निदर्शनम् ॥११२॥
पदमेकं समादाय द्विधा कृत्वा निरुक्तवान् ।
पुरुषादः(क) पदं यास्को वृचे वृचे इति वृचि ॥११३॥
अनेकं सत्तथा चान्यदेकमेव निरुक्तवान् ।
अरुणो मासकृन्मन्त्रे मासकृद्विग्रहेण तु ॥११४॥
पदव्यवायेऽपि पदे एकीकृत्य निरुक्तवान् ।
गर्भं निधानमित्येते न जामय(ख) इति वृचि ॥११५॥
पदजातिरविज्ञाता त्वः पदार्थः सिनामनि ।

(क) ऋ० १०, २७, २२ । (ख) ऋ० १, २३, १६ ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

स्वरानवगमो धायि[क] वनेनेत्यृचि दर्शितः ॥११६॥
शुनःशेफं[ख] नराशंसं[ग] द्यावानः पृथिवीति च ।
निरस्तेति प्रभृतिस्वर्यादासीत् क्रमो यथा ॥११७॥
वर्णस्य वर्णयोर्लोपो वह्नानां व्यञ्जनस्य च ।
अत्राणीतिकपिर्नाभाद[घ]नोयामित्यघासु च ॥११८॥
अर्थात् पदं स्वाभिधेयं पदाद्वाक्यार्थनिर्णयः ।
पदसङ्घातजं वाक्यं वर्णसङ्घातजं पदम् ॥१२९॥
अर्थात् प्रकरणाल्लिङ्गादौचित्याद्देशकालतः ।
मन्त्रेष्वर्थविवेकः स्यादितरेष्विति च स्थितिः ॥१२०॥
इति नानान्वयोपायैर्नैरुक्तैर्यो यतेत सः ।
जिज्ञासुर्ब्रह्मणो रूपमपि दुष्कृत् परं व्रजेत् ॥१२१॥
यथेदमग्रे नैवासीदसदप्यथ वापि सत् ।
जज्ञे यथेदं सर्वं तद्भावतृत्तं वदन्ति तु ॥१२२॥
भावप्रधानमाख्यातं षड्विकारा भवन्ति ते ।
जन्मास्तित्वं परीणामो वृद्धिर्हानं विनाशनम् ॥१२३॥
एतेषामेव षण्णान्तु येऽन्ये भावविकारजाः ।
ते यथावाक्यमपूह्याः सामर्थ्यान्मन्त्रवित्तमैः ॥१२४॥
देवानाञ्च पितॄणाञ्च नमस्कारैस्तथैव च ।
अथ व्यस्तं समस्तं वा शृणु व्याहृतिदैवतम् ॥१२५॥
व्याहृतीनां समस्तानां दैवतन्तु प्रजापतिः ।

(क) ऋ० १, १५८, ३ । (ख) ऋ० ५, २, ७ । (ग) ऋ० १, १३, ३ ।
(घ) ऋ० ९, ७, ६ ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

व्यस्तानामयमग्निश्च वायुः सूर्य्यश्च देवताः ॥१२६॥
वाग्देवत्योऽथ वाप्यैन्द्रो यदि वा परमेष्ठिनः ।
ओङ्कारो वैश्वदेवो वा ब्राह्मो दैवः क एव वा) ॥१२७॥
भावप्रधानमाख्यातं षट्प्रकारा भवन्ति तु ।
जन्मास्तित्वं परीणामो वृद्धिहानिविनाशनम् ॥१२८॥
एतेषामेव वर्णाः स्युरन्ये भावविकारजाः ।
यथावचनमप्यूह्याः सामर्थ्यान्मन्त्रवित्तमैः ॥१२९॥
त्रीण्येव लोके लिङ्गानि पुमान् स्त्र्यथ नपुंसकम् ।
नाभसूक्तप्रदेशेषु योज्यं प्रकरणं त्वनु ॥१३०॥
तेषां तु नामभिर्लिङ्गैर्ग्रहणं सर्वनामभिः ।
कुर्वन्नामानि वै वाऊरन्यदेवत्यया यया ॥१३१॥
यथेदमग्रे नैवासीदसद्वाप्यथवापि सन् ।
जज्ञे यथेदं सर्वन्तु भावतत्त्वं प्रचक्षते ॥१३२॥
वाग्देवत्योऽथ वाप्यैन्द्रो यदि वा परमेष्ठिनः ।
ओङ्कारो वैश्वदेवो वा ब्राह्मो दैवः क एव वा ॥१३३॥
व्याहृतीनां समस्तानां दैवतं तु प्रजापतिः ।
व्यस्तानामयमग्निश्च वायुः सूर्यश्च देवताः ॥१३४॥

इति शौनकाचार्यकृतौ बृहद्देवतायामुपोद्घातप्रकरणम् ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

आग्नेयं प्रथमं सूक्तं मधुच्छन्दस आदितः[१]।
ज्ञेयास्त्वन्योऽन्यदेवत्या[२] स्तृचाः सप्तात उत्तराः ॥१३५॥
वायव्यः प्रथमस्त्वेषामैन्द्रवायव उत्तरः।
मैत्रावरुण आश्विन्य[३] ऐन्द्रो यः पञ्चमस्तृचः[४] ॥१३६॥
[५]नान्यः षष्ठाद्विश्वलिङ्गो गायत्रोऽन्यस्तु यस्तृचः[६]।
वङ्कदैवतमन्यत्तु[७] वैश्वदेवेषु शस्यते ॥१३७॥
लुशेदुवस्यो[८]शार्याते[क] गोतमेऽथ ऋजिश्वनि[ख]।
अवत्सारे[ग] परु[घ]च्छेपे[९] अत्रौ[१०] दीर्घतमस्यृ[ङ]षौ[११] ॥१३८॥

---

(१) आर्षकमिति ग० ङ०। घ० पुस्तकोद्धृतपाठश्च।
(२) सर्वेऽन्यदेवत्या इति ग० ङ०। घ० उ०।
(३) मैत्रावरुणोऽथश्विन इति ख० ग० ङ०। घ० उ०।
(४) त्विन्द्रोवो वैश्वदेवत इति ख०। अप्यैन्द्रोऽतो वैश्वदेवक इति ग०ङ०।
(५) तन्नामा विश्वलिङ्गो वेति ग० ङ०। घ० उ०।
(६) गायत्रोऽस्त्यपरस्तृचः इति क० घ० च०।
(७) वङ्कदेवतमन्त्वस्त्विति क० घ०। वङ्कदैवत्यमन्यत्त्विति ग०।
(८) लुशेऽथ वात्स्ये इति ग० ङ०। घ० उ०।
(९) परुच्छेपे इति ग०। अवत्सारपरच्छेपे इति ख०।
(१०) पुत्रे इति ख० ग० ङ०। घ० उ०।
(११) तत् पृथौ इति ख०।

(क) ऋ० १, ५१, ७। (ख) ऋ० ८, ४६, १०। (ग) ऋ० ५, ४४, १०।
(घ) ऋ० १०, १००, ५। (ङ) ऋ० १, १५८, ६।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

वसिष्ठे नाभानेदिष्ठे(क) गये(ख) मेधातिथौ मनौ(ग) ।
कक्षीवति((घ)१) विहव्ये(ङ) च बहुष्वन्येषु चर्चिषु(२) ॥१३९॥
अगस्त्ये बृहदुक्थे(च) च विश्वामित्रे च(३) गाथिनि(छ) ।
दृश्यन्ते विप्रवादास्तु(४) तासु तासु स्तुतिष्विह ॥१४०॥
वक्तीनां सन्निपातस्तु यस्मिन्मन्त्रे प्रदृश्यते ।
आचार्यौ यास्कशाण्डिल्यौ वैश्वदेवं तमाहतुः(५) ॥२४१॥
पादं वा यदि वार्धर्चमृचं वा सूक्तमेव वा ।
वैश्वदेवं वदेत्सर्वं यत्किञ्चिद्बहुदैवतं(६) ॥१४२॥
ऋषिभिर्देवताः सर्वा विश्वाभिः स्तुतिभिः स्तुताः ।
संज्ञा तु विश्वमित्यासां(७) सर्वावाप्तौ निपातिता(८) ॥१४३॥

---

(१) काक्षीवते इति ख० । कक्षीवते इति घ० उ० ।
(२) अथर्चिषु इति ख० ग० ङ० । घ० उ० ।
(३) विश्वामित्रेऽथेति ख० ङ० । घ० उ० ।
(४) विप्रपादास्वेति क० घ० च० ।
(५) तदाहतुरिति ग० ङ० । घ० उ० ।
(६) वहुदेवतमिति क० च० ।
(७) विश्वमित्येषेति ख० ग० ङ० । घ० उ० ।
(८) निपातितौ इति ङ० । घ० उ० ।

(क) ऋ० १०,६१,१८। (ख) ऋ० ६, २, ८। (ग) ऋ० १, ३६, १६।
(घ) ऋ० १, ५१, १३। (ङ) ऋ० १, १०८, ६। (च) ऋ० ४, २०, १०।
(छ) ऋ० १, ८, १।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सारस्वतः सप्तमस्तु[१] एताः प्रउगदेवताः[२]।
अविध्यमान ऊने वा प्रउगेष्वत आवपेत्[३] ॥१४४॥
सरस्वती तु द्विविधां ह्यृचु सन्दृश्यते स्तुता[४]।
नदीवच्चैव वाग्वैव तयैवमुभयं स्मृतं[५] ॥१४५॥
[६]सुरूपकृत्नु[क]मित्येन्द्रं सप्त चान्योऽन्यतः परं।
षडादह[७] स्वधामिति मारुत्योऽनन्तरा ऋचः ॥१४६॥
एका वीलु[ख]चिदिन्द्रायं[८] मरुद्भिः सह गीयते।

---

(१) सारस्वतस्तु सप्तम इति ग० ङ०। घ० उ०।
(२) सारस्वतस्तु उत्तरमस्तना प्रउगदेवता इति ख०।
(३) अविध्यमान इत्यादिश्लोकार्द्धं ख० ग० ङ० चिह्नितपुस्तकेषु नोपलभ्यते।
(४) ऋचु सर्वासु सा स्तुतेति ग० ङ०। घ० उ०।
(५) नदीवद्देवतावच्च सूत्राचार्य्यस्तु शौनकः इति ख०। अत्र सूक्ताचार्य्य इति ग० ङ०। घ० उ०।
(६) इतः पूर्वं ख० ग० ङ०। घ० उ० चिह्नित पुस्तकेषु नदीवन्निगमाः षट् ते सप्तमो नेत्युवाच ह। अन्वेकाच दृषद्वत्यां चित्रश्च सरस्वती। इयं शुभ्रेभिरित्येतं मेने यास्कस्तु सप्तमम्। पशोः सारस्वतस्यैतां याज्या मैत्रायणीयके। प्राधान्याद्धविषः पश्यन् वाच एवैतरोऽब्रवीत्। इत्यधिकं पठ्यते।
(७) वलादह इति ख० घलादह इति घ०।
(८) एकाविद्युचिमिन्द्रोयमिति क०। एकाविन्नुचिदिन्द्रायेति ख०। एकापीलुचिदिन्द्रायेति ग०। एकावालुचिदिन्द्रायेति ङ०।

(क) ऋ० ३, ४, १। (ख) ऋ० १, ६, ५।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तस्या एकान्तरायासु अर्धर्चन्यो[१]द्विदेवतः ॥१४७॥
मरुद्गणप्रधानोऽयं हीन्द्रस्तु[२] विचिकित्सितः ।
मन्दू[क][३]समानवर्चस्यौ[४] मन्दुनावासवर्चसा ॥१४८॥
मन्दू इति[ख] प्रगृह्णन्ति[५] येषामेष[६] द्विदेवतः ।
एकदैवत्यमाम्नाय्यो विज्ञेयाध्ययनात् पदं[७] ॥१४९॥
रोदसी[ग] देवपत्नीनामथर्वाङ्गिरसे[घ] यथा[८] ।
[९]मरुद्गणप्रधानेयमाचार्याणां स्तुतिर्मता ॥१५०॥
मरुद्गणप्रधानत्वादिन्द्रस्तु विचिकित्स्यते[१०] ।

---

(१) अर्धर्चोऽन्योद्विदेवत इति घ० उ० । ङ० ।
(२) हीत्यं चेति ख० ग० । घ० उ० । मरुद्गणप्रधानो हीत्यं चेन्द्रः इति ङ० ।
(३) मन्दुः इति ख० ।
(४) समानवर्चस्यमिति ग० । समानवर्चसा इति घ० ।
(५) मण्डू इति प्रगृह्णन्तीति क० घ० ङ० च० ।
(६) एषमेवेति ख० । येषामेवेति ग० ङ० । घ० उ० ।
(७) विज्ञायाध्ययनात्पदमिति ख० । विज्ञानाध्ययनात्पदमिति क० घ० ङ० ।
(८) रोदसी इत्यादि श्लोकार्द्धं क० घ० च० चिह्नितपुस्तकेषु नोपलभ्यते ।
(९) मरुद्गणेति ङ० ।
(१०) विचिकित्सितः इति ख० ग० । घ० उ० ।

(क) ऋ० १, ६, ७ । (ख) ऋ० १, ६, ७ । (ग) ऋ० १, १६७, ५ । (घ) ऋ० १०, ६२, १ ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

मरुद्गणं महेन्द्रस्य[१] समांशं सकलं विदुः[२] ॥१५१॥
अग्निमित्यग्निदैवत्यं पादस्त्वत्र द्विदेवतः[३] ॥
निर्मथ्याहवनीयार्थावग्निनाग्निः[४] समिध्यते ॥१५२॥
द्वितीये द्वादशर्चे तु प्रत्यृचं देवताः स्तुताः।
स्तूयन्ते ह्यग्निना सार्द्धं तासां नामानि मे शृणु[५] ॥१५३॥
प्रथमायां स्तुतश्चेधो[क][६] द्वितीयायां तनूनपात्[ख]।
नराशंसं[ग] तृतीयायां चतुर्थ्यां स्तूयते त्विलः[घ] ॥१५४॥
बर्हिः[ङ]रेव तु पञ्चम्यां द्वारो[च] दैव्यस्ततोऽन्यया[७]।
नक्तोषा सा तु सप्तम्यामष्टम्यां तु स्तुतौ[८] सह ॥१५५॥

---

(१) मरुद्गणमहेन्द्रस्येति घ०। मरुद्गणेनेहेन्द्रस्येति क० ख० घ० च०।
(२) समासं शाकलं विदुरिति क० घ० च०।
(३) पादस्त्वत्र द्विदैवतः इति ग० ङ०। घ० उ०।
(४) निर्मथ्याहवनीयार्थो अग्निनाग्निरिति क० घ०। निर्मथ्याहवनीयार्थेऽग्निनाग्निरिति च०।
(५) श्रूयते देवताऽथासां नामानि शृणुते ह नः इति क० घ० च०।
(६) समिद्धस्त्विति क० घ० च०।
(७) अन्यथेति ख०, अन्यपा इति च०।
(८) संस्तुतौ इति ग०, स स्तुतौ इति ङ० पुस्तकान्तरञ्च।

(क) ऋ० १३, ४५, २। (ख) ऋ० १, १३, २। (ग) ऋ० १, १३, ३।
(घ) ऋ० १, १२८, १। (ङ) ऋ० ३, ५३, १७। (च) ऋ० ५, ५, ५।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

दैव्या[क]विति[१] तु होतारौ नवम्यामृचि संस्तुताः।
तिस्रो देव्यो दशम्यां तु ज्ञेयस्त्वष्टे[ख]व तु स्तुतः ॥१५६॥
एकादश्यां तु सूक्तस्य स्तुतिं[२] विद्याद्वनस्पतिम्[ग]।
द्वादश्यां तु स्तुता देव्यो विद्यात्स्वाहाकृतीं[घ]रिह[३] ॥१५७॥
सूक्तेऽस्मिन् प्रत्यृचं यासु[४] देवताः परिकीर्त्तिताः।
ता एव सर्वास्वाप्रीषु द्वितीयायां[५] विकल्प्यते[६]॥१५८॥
प्रैषैः सहैव हैतानि त्वेकादश प्रचक्षते[७]।
यजुषः[८] प्रैषसूक्तं वा दशैतानीतराणि तु ॥१५९॥
सौत्रामणानि[९] तु त्रीणि प्राजापत्याश्वमेधिके।

---

(१) देव्याविति ख० ङ०।
(२) स्तुतमिति ङ०।
(३) देवी विद्यात्स्वाहाकृतीरितीति ग०।
(४) प्रत्यृचे यास्विति क० घ० च०।
(५) द्वितीया त्विति ख०।
(६) विकल्प्यते इति ख० ग० च०।
(७) प्रैषैः सहाप्रीसूक्तानि तान्येकादश सन्ति चेति ख० ग० ङ०। सहाप्री इत्यत्र सहेयेति ख०।
(८) यजूंषीति ख० ग० ङ०।
(९) सौत्रामणीतीति क० घ० च०।

(क) ऋ० १, २७, १२। (ख) ऋ० १, ३२, २। (ग) ऋ० ६, ४८, १७।
(घ) ऋ० १, १८८, ११।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पुरुषस्य च यन्मेधे यजुःष्वेव तु तच्च ह[१] ॥१६०॥
अत्रैव प्रैषसूक्तं स्यान्न यजुःष्वाद्रियेत तत्[२] ।
तेषां प्रैषकृतं[३] यच्च यच्च[४] दीर्घतमा जगौ ॥१६१॥
मेधातिथं[५] यदुक्तं च त्रीण्येवोभयवन्ति तु ।
ऋषिर्गृत्समदो[क][६] यच्च वाध्र्यश्व[ख]स्तु[७] यदुच्यते ॥१६२॥
नराशंसवदत्रि[ग]स्तु[८] ददृशेऽथ[९] यदौर्वशः ।
तनूनपादगस्त्यस्तु[१०] जमदग्नि[घ]स्तु[११] यज्जगौ ॥१६३॥
विश्वामित्र[ङ] ऋषिर्यच्च जगौ वै काश्यपोऽसितः[च] ।
मेधातिथेस्त्वृचां[१२] यास्तु प्रोक्ता द्वादश देवताः ॥१६४॥

---

(१) तानि षड़िति ख० ग० ङ० ।
(२) यजुःष्वादि येषु चेति क० घ० च० ।
(३) प्रैषगतं सूक्तमिति ग० ।
(४) यच्च तच्चेति ख०, यत्तु तच्चेति ङ० पुस्तकान्तरच्च ।
(५) मेधातिथेरिति ख०, मेधातिथाविति ग० ङ० पुस्तकान्तरच्च ।
(६) ऋषौ गृत्समदे इति ग० ङ० पुस्तकान्तरच्च ।
(७) वाध्र्यश्वे चेति ग० ङ० पुस्तकान्तरच्च ।
(८) अत्रेश्चेति ख० ग० ङ० पुस्तकान्तरच्च ।
(९) ददर्श चेति ख० ग० ङ० पुस्तकान्तरच्च ।
(१०) चेति ग० ङ० पुस्तकान्तरच्च ।
(११) वामदेवश्चेति ग०, जामदग्न्यश्चेति ङ० पुस्तकान्तरच्च ।
(१२) ऋचः इति ख० ग० ङ० पुस्तकान्तरच्च ।

(क) ऋ० २, १९, ८ । (ख) ऋ० १०, ६९, ५ । (ग) ऋ० १, १३९;९ ।
(घ) ऋ० ३, ५३, १५ । (ङ) ऋ० ३, ५३, ९ । (च) ऋ० १, ४६, १० ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सम्पद्यन्ते यथाग्नीकाः[१] सम्पदं तां निबोधत ।
दृभ्रो[क]यः सोऽय[२]मेवाग्निरयं हौभ्रे[ख][३] समिध्यते ।
भ्रातेवैतत्कृतं[४] रूपं भ्रातो[ग] हौभ्रः[५] समिध्यते[घ] ॥ १ ६ ५ ॥

इति बृहद्देवतायां द्वितीयोऽध्यायः ।

---

(१) यथाग्निं ताः इति ख० ग० ङ० पुस्तकान्तरञ्च ।
(२) सर्व्वमिति ख० ग० ङ० पुस्तकान्तरञ्च ।
(३) हौभ्रः इति ग० ङ० पुस्तकान्तरञ्च ।
(४) भ्रातेवैतत्कृतमिति क० ग० घ० च० ।
(५) हौन्ध्रे इति ग० ङ० पुस्तकान्तरञ्च ।

(क) ऋ० ८, ४६, २ । (ख) ऋ० ७, १, १६ । (ग) ऋ० ५, ९, ५ । (घ) ऋ० ४, १५; ४ ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अथ तृतीयोऽध्यायः ।

तनूनपादयन्त्वेव नाम्ना सोऽप्युच्यते तनूः[१] ।
नपा[क]दिति प्रजामाऊरमृतस्य[२] च सम्भवम् ॥ १ ॥
नराशंसन्त्विहैके तु[३] होतृभिस्त्वाऊरध्वरे[४] ।
नराः शंसन्ति सर्व्वेऽस्मिन्नासीना इति वादिनः[५] ॥ २ ॥
तदाऊरग्निमेवायं[६] नराशंसोऽध्वरे त्वयम्[७] ।
नरैः शस्यत आसीनैराऊस्त्व ऋत्विजो नराः[८] ॥ ३ ॥
इला त्विति कृतं रूपं ह्यृषिभिर्गतिकर्म्मणः[९] ।

---

(१) यक्तत्यसौ तनुमिति ख० ग० ङ० पुस्तकान्तरञ्च ।
(२) अमृतोऽस्येति ख० ग० ङ० पुस्तकान्तरञ्च ।
(३) नराशंसमिहैके त्विति ख० ग० ङ० पुस्तकान्तरञ्च ।
(४) अग्निमाऊरध्वेतरे इति ग० ङ० पुस्तकान्तरञ्च ।
(५) वाऽध्वरे इति ग० ङ० पुस्तकान्तरञ्च ।
(६) एतमेवाऊरन्येऽग्निमिति ग० ङ० पुस्तकान्तरञ्च ।
(७) ह्ययमिति ख० ग० ङ० पुस्तकान्तरञ्च ।
(८) चैवर्त्विजो नरः इति ख० ग० ङ० पुस्तकान्तरञ्च ।
(९) इडस्त्विषिकृतं रूपमीडेश्च स्तुतिकर्म्मणः इति ग० ङ० पुस्तकान्तरञ्च। इड ईत्यत्र इषः, ईडेश्च इत्यत्र ईष्टोश्चेति ख०, स्तुतिकर्म्मणः इत्यत्र, गतिकर्म्मणेति च० ।

(क) ऋ० १, १४३, १ ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

इडावां[क]स्तेन चोक्ताग्निरिरिणा[ख][१]गतिकर्म्मणा[२] ॥ ४ ॥
वर्हि[ग]रेवायमग्निस्तु सर्वं हि परिवृंहितम् ।
अन्नेन यः स्तुतौ[३] वासन्निध्मेन परिवृह्यते[४] ॥ ५ ॥
द्वार[घ]स्तु[५] देव्यो याः प्रोक्ता विश्वेषां तास्तु यत्नतः ।
अग्नायी[ङ]मनुवर्त्तन्ते तथाग्नाय्यग्निमेव च[६] ॥ ६ ॥
अग्नौ ध्रुवं स्थितास्तास्तु[७] स्तूयन्ते चाग्निना[८] सह ।
प्राधान्यन्तासु चैवाग्नेः स्तुतिष्वथ[९]हविःषु च ॥ ७ ॥
नक्तोषा सा[१०] च ये देव्यावाग्नेय्यावेव ते स्मृते ।

---

(१) इड़िनेति ग०, ईड़िनेति ङ० पुस्तकान्तरञ्च ।
(२) वर्धिकर्म्मिणेति ग०, वर्धिकर्म्मणेति ङ०, बुद्धिकर्म्मणेति पुस्तकान्तरं ।
(३) यद्भुत इति ग० ङ० पुस्तकान्तरञ्च ।
(४) परिवृंहित इति ग० घ० ङ० ।
(५) द्वारस्येति ख० ग० ङ० पुस्तकान्तरञ्च ।
(६) आग्नायीमन्ववर्त्तन्त नाग्निं नाग्नाय्य एव चेति क० घ० च० ।
(७) ध्रुवास्थितत्वात्त्विति क० घ० च० ।
(८) संस्तूयन्तेऽग्निनेति ख० ग० ङ० ।
(९) स्तुतिष्वेवेति ग० ङ० पुस्तकान्तरञ्च ।
(१०) नक्तोषाऽसौ इति ख० ग० ङ० पुस्तकान्तरञ्च ।

(क) ऋ० ४, २, ५ । (ख) ऋ० ८, ८७, १ । (ग) ऋ० ३, ५३, १७ ।
(घ) ऋ० १, १३, ६ । (ङ) ऋ० १, २२, १२ ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

श्यामाग्नेयी[१] हि कालस्य तस्यैवोषाः[क] कलैव तु[२] ॥ ८ ॥
तम उच्छत्यु[घ]षा नक्ता[ङ] नक्तौमां हिमबिन्दुभिः ।
अपि वा[३] व्यक्तवर्णेति नञ् पूर्व्वां वे[च]रिदं[४] भवेत्[५] ॥ ९ ॥
नाम्ना भवत्युषा[६]श्चैव सैषा[७] प्रागुदयाद्रवेः ।
[८]सा हि वोषा[९] भवत्यादौ मध्ये प्राप्ते तमस्वती[१०] ॥ १० ॥
दैव्याविति[११] तु होतारावुभौ[१२] पार्थिवमध्यमौ ।

---

(१) भाव्याग्नेयीति ख०, श्यावाग्नेयीति ग०, श्याव्याग्नेयीति ङ० पुस्तकान्तरञ्च ।
(२) किला(ख)ऽवमे(ग)ति क० घ० च० ।
(३) अभि वेति ख० ।
(४) चेरिदमिति ख० ।
(५) तम उच्छत्युषेति श्लोकः क० घ० च० पुस्तकेषु न दृश्यते ।
(६) उषाः इत्यत्र उषेति पाठः संगतः ।
(७) शेषेति ख० ।
(८) ख० ग० ङ० पुस्तकेषु, सा हि वोषेति श्लोकार्द्धं, नाम्ना भवत्युषाश्चैवेति श्लोकार्द्धात् प्राक्, पठितं ।
(९) दोषेति क० घ० च० ।
(१०) निशीथे सा तमस्विनीति ख० ग० ङ० पुस्तकान्तरञ्च ।
(११) देव्यावितीति ख० ग० ।
(१२) अग्नी इति ग० ङ० पुस्तकान्तरञ्च ।

(क) ऋ० १, ४६, १ । (ख) ऋ० १ ३२,४ । (ग) ऋ० ३, ५४, ५ ।
(घ) ऋ० १, ४६, १ । (ङ) ऋ० १, ७३, ७ । (च) ऋ० १,७२, ९ ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

दिव्यादग्नेस्तु[१] जज्ञाते देव्यौ तेनेह जन्मना[२]॥ ११ ॥
तिस्रस्तु देव्यो याः प्रोक्तास्तिस्रानेवेह सा तु वाक्।
त्रिविधेनोच्यते नाम्ना ज्योतिःषु त्रिषु वर्त्तिनी॥ १२ ॥
अग्निमेवानुगेला[३] तु मध्ये त्वैन्द्री[४] सरस्वती।
अमुं स्थिताधिलोकन्तु[५] भारती भारतो ह्यसौ॥ १३॥
सैषा तु त्रिविधा वै वाग्दिवि च व्योम्नि चेह च।
व्यस्ता [६]चैव समस्ता च भजतेऽग्नीनिमानपि[७] ॥ १४॥
त्वष्टा तु यः सोऽयमेव [८]पार्थिवोऽग्निरिति श्रुतिः[९]।
पार्थिवस्यास्य वर्चः स्युः कस्याप्यृक्[१०]चार्त्तवेषु च[११] ॥ १५॥
त्विषित[क]स्तुष्टुतो वा स्यात् [१२]तूर्णमश्नुवतीति वा[१३]।

---

(१) हीति ख० ग० ङ० पुस्तकान्तरञ्च।
(२) कथ्यत इति क० ख० ङ० च०।
(३) अनुशैलेति ख०, अनुसेलेति क० घ० च०।
(४) प्राप्तेति ख० ग० ङ० पुस्तकान्तरञ्च।
(५) स्थितविलोकन्त्विति क० घ० च०।
(६) व्याप्तेति क० घ० च०।
(७) भजत्यग्नीनिमानन्विति क० घ० च०।
(८) ऋगामेवेति ख० ङ० पुस्तकान्तरञ्च, यत् स्वयं प्रोक्त इति ग०।
(९) स्तुतिरिति ख० ग० ङ० पुस्तकान्तरञ्च।
(१०) कास्यावोदिति ख०, कस्याप्यगिति ङ० पुस्तकान्तरञ्च।
(११) पार्थिवो वाग्रश्वे च कौत्सा त्रिष्वार्त्तवीषु चेति क० घ० च०।
(१२) तुच्छिते वा स्यादिति ख०, त्वच्छतेर्वा स्यादिति ग० ङ० पुस्तकान्तरञ्च।
(१३) अश्रुत एव वेति ख० ग०, वा इत्यत्र चेति ङ० पुस्तकान्तरञ्च।

(क) ऋ० १०, ८४, २।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

कर्मसु त्वरणां वेत्ति (१)तेन नामैत(२)दश्नुते ॥१६॥
यः सहस्रतमौजसु (३)रवेश्चन्द्रमुपाश्रितः(४) ।
सोऽयं(५) त्वष्टारमेवाग्निः (६)परं वन्दे च यन्मधु(७,(क) ॥१७॥
प्रादाद्ब्रह्मा च (८)सुप्रीतः पुत्राय(९) यदथर्वणे(१०) ।
स चाभवदृषिस्तेन ब्रह्मणा वीर्यवत्तमः(११) ॥१८॥
तमृषि(१२)र्निषिषेधेन्द्रो (१३)मैवं वोचः (१४)क्वचिन्मधु ।
न हि प्रोक्ते मधुन्यस्मिन् जीवन्तं त्वोत्सृजाम्यहं(१५) ॥१९॥

---

(१) कर्म्मसूत्तारणो वेतीति ग० ङ०, वेतीत्यत्र वेत्तीति ख० पुस्तकान्तरञ्च।
(२) नाम्नैतदिति ख० ।
(३) सहस्रतमो रश्मिरिति ग० ङ० ।
(४) चन्द्रमसोश्रित इति क० घ० च० ।
(५) सोऽपीति ख० ग० ङ० पुस्तकान्तरञ्च ।
(६) अग्निमिति ग० ङ० पुस्तकान्तरञ्च ।
(७) वेदवतं मनुमिति ख०, चेह च यन्मध्विति ग०, वेद च यन्मध्विति ङ०, देव च यन्मध्विति पुस्तकान्तरं ।
(८) अपीति ख० ग० ङ० पुस्तकान्तरञ्च ।
(९) सुतायेति ख० ग० ङ० पुस्तकान्तरञ्च।
(१०) तदथर्वण इति ख० ग० ङ० पुस्तकान्तरञ्च ।
(११) दीप्तिमत्तरः इति ख० ग० ङ० पुस्तकान्तञ्च।
(१२) तं त्वृषिरिति क० घ० च० ।
(१३) निषिषिवेन्द इति क० घ० च० ।
(१४) मेदं वाचः इति क० घ० च० ।
(१५) मधौ ब्रह्मन् जीवनं त्वहमुत्सृजे इति क० घ० च० ।

(क) ऋ० १, १४, १० ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तमृषिं त्वश्विनौ देवौ विधिव[१]न्मध्वयाचतां[२] ।
स च ताभ्यां तदाचष्टे यदुवाच शचीपतिः ॥२०॥
तमब्रूतान्तु नासत्यावाश्वेन [३]शिरसाऽभवत् ।
मध्वाशु ग्राहय त्वं त[४]न्नेन्द्रश्च त्वां हनिष्यति[५] ॥२१॥
आश्वेन [६]शिरसा तौतु [७]दध्यङ्ङाह यदश्विनौ[८] ।
तदास्येन्द्रोऽहरत्सन्तं [९]न्यधात्तामस्य तौ शिरः[१०] ॥२२॥
दधीच[क]स्त[११]च्छिरस्याश्वं कृतं वज्रेण वज्रिणा ।
पपात सरसो मध्ये पर्वते शर्यणावति[ख] ॥२३॥
तदश्वस्तु[१२] समुत्थाय भूतेभ्यो विविधान् वरान् ।

---

(१) विविक्ते इति ग० ङ० पुस्तकान्तरञ्च ।
(२) याचत्विति क० ख० ङ० च० ।
(३) वाश्व्येनेति ग० ङ० पुस्तकान्तरञ्च ।
(४) त्वावामिति क० ख० घ० च० ।
(५) मेन्द्रश्च त्वावधीत्ततः इति ख० ग० ङ० पुस्तकान्तरञ्च ।
(६) आश्व्येनेति ङ० पुस्तकान्तरञ्च ।
(७) ताभ्यामिति ख०, तत्त्विति क० घ० च० ।
(८) यदश्विनोरिति क० घ० च० ।
(९) तदस्येन्द्रो हरस्येहेति ख० ।
(१०) यावनधत्तामस्य यच्छिर इति ग०, नवतामस्य यच्छिरः इति ख०, चान्यनधत्तामस्य चच्छिरः ङ० पुस्तकान्तरञ्च ।
(११) दधीचश्चेति ग० ङ० पुस्तकान्तरञ्च ।
(१२) तच्छिरस्त्विति क० ख० घ० च० ।

(क) ऋ० १, ८४, १३ । (ख) ऋ० १, ८४, १४ ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

प्रादात्स[१]युगयर्यन्तं ताखेवाप्सु न्यमज्जत[२] ॥२४॥
त्वष्टा रूपविकर्त्ता च योऽसौ माध्यमिके गणे।
स्तुतः स च निपातेन[३] सूक्तान्तस्य न विद्यते ॥२५॥
[क]वनस्पतिं तु यं प्राहुरयं सोऽग्निर्वनस्पतिः।
अयं वनानां हि पतिः पाता पालयतीति च[४] ॥२६॥
अग्निर्गृत्समदेना[ख]ऽयं वनस्पतिवदीडितः।
मन्दस्वे[ग]त्यस्य [५]सूक्तस्य [६]षडृचस्य तृतीयया ॥२७॥
यूपवत्तरुवच्चैव स्तुतिर्याच [७]प्रसङ्गजा।
समस्तेनैव सूक्तेन [८]तृतीये सा तु मण्डले ॥२८॥
स्वाहाकृतीष्व[घ]सङ्ख्यास्तु [९]विदुषां मतयोऽभवन्।

---

(१) प्रादायेति ख० ग० ङ० पुस्तकान्तरञ्च।
(२) निमज्जतीति ख० ग० ङ० पुस्तकान्तरञ्च।
(३) निपाते चेति क० घ० च०।
(४) वेति क० घ० च०।
(५) मन्दस्वेति चेति ग० ङ० पुस्तकान्तरञ्च।
(६) सूक्ते चेति ग०।
(७) यास्येति ग० ङ० पुस्तकान्तरञ्च।
(८) सर्व्वेणांजंतिसूक्तेनेति ख० ग० ङ०, सर्व्वेणां यतिसूक्तेनेति पुस्तकान्तरं।
(९) क० घ० च० पुस्तकेषु, स्वाहाकृताखसंख्यास्त्विति पाठोऽस्ति। स्वाहाकृतयोऽनेकास्वेति ख० ग० ङ० पुस्तकान्तरञ्च।

(क) ऋ० ६, ४८, १७। (ख) ऋ० २, १६, ८। (ग) ऋ० १, २६, ५।
(घ) ऋ० १, १८८, ११।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तत्सर्वं सोऽय(१)मेवाग्निर्भवतीति विनिश्चयः ॥२९॥
अयं कर्त्ता च देवानां (२)साहुतिस्तामिहैकजा ।
अयं प्रसूतिर्भूतानां स तेषा(३)मयमव्ययः ॥३०॥
तनूनपा(क)द्वितीया तु (४)नराशंस(ख)वती च या ।
समस्यते (५)प्रयोक्तव्ये त्रिष्वेवोभयवत्स्विह(६) ॥३१॥
नराशंसवती वा स्या(७)द्वितीयेह (८)प्रजार्थिनां ।
बलकामोऽथ वा यः स्या(९)द्भूरिमिच्छति वापि (१०)यः(११) ॥३२॥
आग्नेयमिति(१२) यत्त्वेभि(१३)र्वैश्वदेवमिहोच्यते ।

---

(१) त्वयमिति ग० ङ० पुस्तकान्तरञ्च ।
(२) अयं हि कर्त्ता स्वाहानामिति ख० ग० ङ० पुस्तकान्तरञ्च ।
(३) सर्व्वेषामिति ख० ग० ङ० पुस्तकान्तरञ्च ।
(४) चेति ख० ग० ङ० पुस्तकान्तरञ्च ।
(५) समस्येते इति ख० ग०, समष्येते इति ङ० पुस्तकान्तरञ्च ।
(६) उभयवस्त्विति ग०, उभयवत्सु त्विति ङ०, उभयवत्सु चेति पुस्तकान्तरं ।
(७) चास्यादिति ग० ङ० ।
(८) चेति ख० ग० ङ० पुस्तकान्तरञ्च ।
(९) अन्नकामो वेति ख० ग० ङ० पुस्तकान्तरञ्च ।
(१०) भूतिमिच्छेदथापीति ख० ग० ङ० पुस्तकान्तरञ्च ।
(११) वेति ग० ।
(१२) आग्नेयं सूक्तमिति ख० ग० पुस्तकान्तरञ्च, आग्नेये सूक्तमिति ङ० ।
(१३) सूक्तमेभिर्यदिति ख० ग० ङ० पुस्तकान्तरञ्च ।

(क) ऋ० १, १८८, २। (ख) ऋ० १, १४२, ३।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तद्विश्वलिङ्गं गायत्रं (क)वैश्वदेवेषु शस्यते ॥३३॥
इन्द्रसोममितीन्द्रं तु (१)यद्वा दशकमार्त्तवम् ।
तस्मिन् सहर्तुना सप्त प्रत्यृचं स्तौति देवताः ॥३४॥
तत्रर्त्तुनेति षट्स्वृत्तु चतसृष्वृतुभिः सह ।
पुनर्द्वयोर्ऋतुनेति वज्रत्वैकत्वलक्षिताः ॥३५॥
ऋतवो देवताभिश्च निपातेनेह संस्तुताः ।
अथर्त्तुप्रैषसूक्ते च तथा गार्त्समदेऽपि च(२) ॥३६॥
मुख्यया त्विन्द्रमेवास्तौ(३)न्मरुतस्तु द्वितीयया ।
तृतीयया तु त्वष्टारमग्निन्तु परया ततः(४) ॥३७॥
पञ्चम्या तु पुनः शक्रं षष्ठ्या देवावृतावृधौ ।
सप्तम्या द्याभिरग्निन्तु चतुर्भिर्द्रविणोदसं(ख) ॥३८॥
आदेशाद्दैवतं ज्ञेयमृङ्मन्त्राणां न(५) लिङ्गतः ।
न शक्यं लिङ्गतोऽप्यासां(६) ज्ञातुन्तत्त्वेन दैवतं(७) ॥३९॥

---

(१) इन्द्रसोमं पिबेतीममिति ख० ङ० पुस्तकान्तरञ्च, इममित्यत्र इदमिति ग० ।
(२) तत्रर्त्तुनेति षट्स्वृत्तु इत्यादि तथा गार्त्समदेऽपि चेत्यन्तपाठः क० घ० च० चिह्नितपुस्तकेषु न विद्यते ।
(३) एवोर्चन्निति क० घ०, एवार्चन्निति च० ।
(४) चतुर्थ्या चाग्नि मेव चेति ख० ग० ।
(५) मन्त्राणान्त्विति क० घ० च० ।
(६) ह्यासामिति ख० ङ० पुस्तकान्तरञ्च ।
(७) देवताः इति क० घ० च० ।

(क) ऋ० १, २७ ४ । (ख) ऋ० ९, ८८, ३ ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

एकादश्या तु नासत्यौ[क] द्वादश्याग्निमिमं पुनः।
पृथक् पृथक् स्तुतीदन्तु सूक्तमाह रथीतरः[१] ॥४०॥
बह्वदैवे द्विदैवे[२] वा गुणैर्वा[३] यत्र कर्म्मजैः।
स्तूयते देवतैकैका विभक्तस्तुति[४] तद्विदुः ॥४१॥
वैश्वदेवानि सूक्तानि त्रिविधानि भवन्ति तु।
सूर्यसंस्तवसंयुक्तं विश्वलिङ्गं पृथक्स्तुतिः[५] ॥४२॥
पृथक्स्तुति तु यत्प्रोक्तं तद्विद्या[६]द्बह्वदैवतम्।
विश्वलिङ्गन्तु तद्यत्र विश्वैः स्वैः कर्म्मजैर्गुणैः[७] ॥४३॥
विश्वानुद्दिश्य यद्देवान् स्तौति[८] सूर्य्यमनेकधा।
देवानेवा[९]भिसंस्तौति तं प्राहुः सूर्य्यसंस्तवम् ॥४४॥
न तु भागोऽश्वसूक्तादौ[१०] न सूर्य्ये त्वौषधेषु वा[११]।

---

(१) रथान्तरः इति ख०।
(२) बह्वदेवतद्वन्द्वे इति क० घ० च०, बह्वदेवते द्वन्द्वे इति ख०।
(३) गुणैः स्वैरिति क० घ० च०।
(४) देवतैककामभक्तिस्तुतीति क० ख० घ० च०।
(५) पृथक् स्तुतीति निर्विसर्गान्तपाठः समीचीनः।
(६) यद्विद्यादिति क० घ० च०।
(७) कर्म्मभिः स्तुतः इति क० घ० च०।
(८) देवांस्तु यत्रैति क० घ० च०।
(९) देवैरेवेति क० घ० च०।
(१०) भागस्य सूक्तादाविति ख० ग० ङ० पुस्तकान्तरञ्च, भागो स्वसूक्तादाविति च०।
(११) सूक्तेष्वेवौषसेषु वेति ग०, सूक्तेष्वेवौषसेषु वेति ङ०।

(क) ऋ० १०, २४, ५।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

न सावित्रे क्रयामीति[क] न सूर्य्यायां[ख] क्रतौ मुखे[१] ॥४५॥
न चैवैवं प्रपादेषु[२] मन्त्रेष्वन्येषु केषुचित्।
न च यत्र सजोषेति पदं वा स्यात् सजू[ग]रिति ॥४६॥
यस्मिन्[३] प्रसङ्गादपि तु बह्वीनां परिकीर्त्तनम्।
वैश्वदेवं तदप्याह स्थविरो लोमकायनः[४] ॥४७॥
असंस्तुतं संस्तुतवत्[५] प्रदिष्टं दैवतं क्वचित्।
मन्त्रैस्तदृषयोऽर्च्चन्ति[६] तान्तु बुध्येत शास्त्रतः[७] ॥४८॥
आदौ तु मध्ये वान्ते च विधावृत्तु च कर्म्मभिः[८]।
कर्म्माण्यनुपदिष्टानि प्रदिष्टान्यपि तु क्वचित्[९] ॥४९॥
कर्म्मैव तावत्सावित्र्यां निविदि स्तौति कर्म्मणा।

---

(१) मखे इति ग० ङ०।
(२) प्रवादेष्विति ख० ग० ङ०।
(३) अस्मिन्निति क० घ० च०।
(४) रोमकायनः इति ख० ङ०।
(५) स्तुतं वापीति ख० ग० ङ०।
(६) देवतामृषयोऽर्च्चन्तः इति क० घ० च०।
(७) शास्त्रविदिति ख० ग० ङ० पुस्तकान्तरञ्च।
(८) पृथक्त्वेषु च कर्त्तृभिरिति ग० च०, पृथक्केषु च कर्त्तृभिरिति पुस्तकान्तरं।
(९) वृत्तवदिति क० घ० च०।

(क) ऋ० १, ३५, १। (ख) ऋ० ५, ७३, ५। (ग) ऋ० १, २३, ७।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यद्वेनुसप्यनडुहो[१] वोढा दोग्ध्याश्चुरेव वा ॥५ ०॥
भागेयः स्तौति चाग्न्यादीन्मित्रादीनश्वसंस्तुतौ[२] ।
यदैभिरिति चैतस्मिन् वैश्वदेवेऽग्निमर्चति ॥५ १॥
तदाऊरादावन्ते च प्रायशोऽन्यां स्तुवन्नृषिः[३] ।
प्रातर्योगात्[क][४] प्रसङ्गाद्वा स्तौत्यन्यामपि देवताम् ॥५ २॥
यस्यां वदत्यर्थवादान्[५] सा ज्ञेया सूक्तभागिनी ।
यान्तु स्तौति प्रसङ्गेन सा विज्ञेया निपातिनी ॥५ ३॥
चतुर्द्धा भण्यते[६] चास्मिन् सूक्ते वै[७] सूक्तभागिनी ।
यस्मिन् सर्वांस्तु राजर्षीनृषीन् वापि स्तुवन्नृषिः ॥५ ४॥
मेधातिथिरगस्त्यस्तु[८] बृहदुक्थो मनुर्गयः[ख] ।
ऋजिश्वा[ग] च सुकर्णश्च शार्यातो[घ] गोतमो लुशः[९] ॥५ ५॥

---

(१) यद्वेनुः सप्यनड्वाहाविति ङ० पुस्तकान्तरञ्च ।
(२) चाश्वसंस्तुताविति क० ख० घ० च० ।
(३) अन्याः स्तुवन्नृचः इति ग० ङ० पुस्तकान्तरञ्च ।
(४) प्रतियोगादिति ग० ङ० पुस्तकान्तरञ्च ।
(५) वदन्त्यर्थवादाः इति क० घ० च० ।
(६) न तु व्याहन्यते इति क० घ० च० ।
(७) वेति ग० ।
(८) चेति ख० ङ० ।
(९) मानवो यमः इति ख० ग० ङ० पुस्तकान्तरञ्च ।

(क) ऋ० १०, ४१, २ । (ख) ऋ० ६, २, ८ । (ग) ऋ० ५, २९, ११
(घ) ऋ० ३, ५१, ७ ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

स्वस्त्यात्रेयः परुच्छेपः कचीवा(क)नाथिरौर्वशः(१) ।
नाभाक(ख)श्चैव निर्दिष्टो दुवस्यु(ग)र्ममतासुतः(२) ॥५ ६॥
विहव्यः(घ) कश्यप ऋषि(३)रवत्सारश्च नामयः(ङ) ।
वामदेवो मधुच्छन्दाः पार्थो दक्षसूता(४)दितिः ॥५ ७॥
जुह्वर्गृत्समद(च)श्चर्षिर्देवाः सप्तर्षयश्च(५) ये ।
तापसोऽग्निर्ऋषिः(६) कुत्सः(छ) कुसीदी चित(ज) एव च ॥५ ८॥
बन्धुप्रभृतयश्चैव चत्वारो भ्रातरः पृथक् ।
विष्णुश्च नेजमेषश्च नाम्ना संवनन(७)(झ)श्च यः ॥५ ९॥
एते तु सर्व्व(८) एवास्य विश्वैः स्वैः कर्म्मजैर्गुणैः ।
समस्तैरथ च(९) व्यस्तैः पृथक्सूक्तेषु तुष्टुवुः ॥६ ०॥

---

(१) उर्व्वसुरिति ङ० पुस्तकान्तरञ्च ।
(२) ममतासुताः इति घ० च० ।
(३) चर्षिरिति ख० ङ० पुस्तकान्तरञ्च ।
(४) पाथ्योदकसुतेति क० घ० च० ।
(५) देवास ऋषयश्चेति ङ० पुस्तकान्तरञ्च ।
(६) यमोऽत्रिस्तापसः इति ग० ङ० पुस्तकान्तरञ्च ।
(७) सञ्चवन इति ग० ।
(८) सर्व्वा इति क० घ० च० ।
(९) वेति ङ० पुस्तकान्तरञ्च ।

(क) ऋ० १, १२६, २ । (ख) ऋ० ८, १४, २ । (ग) ऋ० १०, १००, १२ । (घ) ऋ० १, १०८, ६ । (ङ) ऋ० १, १३९, ९ । (च) ऋ० २, १९, ८ । (छ) ऋ० १, १०६, ६ । (ज) ऋ० १, ५२, ५ । (झ) ऋ० १०, ९३, १२ ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पार्थिवो द्रविणोदा[क]ग्निः[१] पुरस्ताद्यस्तु कीर्त्तितः।
तमाऊरिन्द्रं दाढत्वा[२]देके तु बलवित्तयोः ॥६ १॥
अयं हि द्रविणोदाऽग्निरयं दाता बलस्य हि।
द्रविणोदाग्निरेवायं द्रविणोदा[ख]स्तदोच्यते ॥६ २॥
आग्नेयेष्ववदृश्येत[३] प्रवादाद्द्रविणोदसः।
[४]ऐन्द्रस्य नवकस्येह[५] यदैन्द्रावरुणं परम् ॥६ ३॥

---

(१) द्रविणोदोऽग्निरिति क० घ० च०।

(२) अतिदाढत्वादिति ङ० पुस्तकान्तरञ्च।

(३) आग्नेयेष्वेव दृश्यन्ते इति ग०।

(४) ख० ङ० चिह्नितपुस्तकयोः, पुस्तकान्तरे च ऐन्द्रस्य नवकस्येहेति श्लोकार्द्धात्प्राक्, द्रविणोदाग्निरेवायमिति श्लोको न विद्यते। तत्र,—

जायते च बलेनायमध्येतृषिभिरध्वरे।
हवींषि द्रविणां प्राऊर्हविषो यत्र जायते ॥
दातारश्चर्त्विजस्तेषां द्रविणोदास्ततः स्वयम्।
ऋषीणां पुत्र इत्येषां दृश्यते सहसोपहौ ॥
मध्यमाद्वा यतो जज्ञे तस्माद्वा द्रविणोदसः।

एतत्सार्द्धश्लोकद्वयं दृश्यते। ङ० चिह्नितपुस्तके द्रविणोदसः इत्यत्र द्राविणोदस इतिपाठः, पुस्तकान्तरे च अध्येतीत्यत्र अध्येत्विति पाठोऽस्ति।

(५) नवकस्याद्वेति ङ० पुस्तकान्तरञ्च।

(क) ऋ० १, १५, १०। (ख) ऋ० १, १५, ७।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तस्योत्तरं तु (१)सोमानं स्तूयते ब्रह्मणस्पतिः।
ऋग्भिः पञ्चभिराद्याभि(२)स्तिसृभिः सदसस्पतिः ॥६४॥
नराशंसो(क)ऽन्त्यया चर्चा सोमेन्द्रौ तु निपातितौ।
चतुर्थ्यां सोम इन्द्रश्च पञ्चम्यां दक्षिणा सह(३) ॥६५॥
प्रसङ्गादृषिणा प्रोक्ताः सम्बन्धाः स्यानलोकयोः।
प्राजापत्यं तयेन्द्रः स्यादिति तस्येह नामनी(४) ॥६६॥
कथिते द्वे च षट्चान्यान्येषाञ्चाद्याः(५) प्रजापतिः।
(६)शिष्टानि यानि नामानि तानि वक्ष्याम्यतः परं ॥६७॥
सप्तभिः कश्च कामश्च सदसस्पतिरेव च।
इलस्पति(७)र्वाचस्पतिस्तत(८)स्तु ब्रह्मणस्पतिः ॥६८॥
तृतीयान्ते तु सूक्तस्य चतुर्थं(९) पञ्चमञ्च यत्।

---

(१) तस्योत्तरे चेति क० घ० च०।
(२) अग्न्याभिरिति ङ०।
(३) तयेति क० घ०।
(४) यानि तस्येह नामानि प्राजापत्यानि तानि त्विति ङ० पुस्तकान्तरञ्च।
(५) कथितानीह षण्ढ्यानि तेषां त्वाद्य इति ङ० पुस्तकान्तरञ्च।
(६) शिष्टानीति श्लोकार्द्धं क० ग० घ० च० चिह्नितपुस्तकेषु न दृश्यते।
(७) इडस्पतिरिति क०।
(८) स्तुत इति ख० च०।
(९) प्रथममिति ख० ङ० पुस्तकान्तरञ्च।

(क) ऋ० १, १४२, ३।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

चतुर्भिरितरैस्तत्र[१] न सूक्तं नाप्यृगुच्यते[२]॥ ६९॥
सर्वाण्येव तु सर्वासां देवतानां प्रजापतेः ।
नामानि कथयन्त्येते सम्यग्भक्तिदिदृक्षवः ॥७०॥
तदाङ्गैर्नैतदेवं स्यादष्टानामेव[३] हि स्मृतः ।
तैरेव चास्य कल्प्यन्ते[४] क्रतवश्च हवींषि च ॥७१॥
मरुद्भिर्मध्यमस्थानैः पर[५] मग्निस्तु पार्थिवः ।
नवकेनेह[६] सूक्तेन प्रतीत्य[७][क]मिति संस्तुतः ॥७२॥
मरुतां साहचर्य्यात्तु[८] सूक्तेऽस्मिन्नाग्निमारुते ।
मन्यते माध्यमञ्चैव[९] यास्कोऽग्निं न तु पार्थिवम् ॥७३॥
स्यादयं पार्थिवस्त्वेव[१०] तथा रूपं हि दृश्यते ।

---

(१) स्त्वेनमिति क० घ० च० ।
(२) नापि त्वृचोऽश्नुते इति क० घ० च०, नानाप्यृचोऽश्नुते इति ग० ।
(३) एष इति ख० ग० ङ० ।
(४) तैरेवास्य प्रकल्प्यन्ते इति ख० ङ० पुस्तकान्तरञ्च ।
(५) अयमिति क० ग० घ० च० ।
(६) नवर्चनेहेति ङ० पुस्तकान्तरञ्च ।
(७) प्रगृह्यमिति ङ० ।
(८) वेति ङ० ।
(९) मध्यमं त्वेवमिति ख० ङ० पुस्तकान्तरञ्च ।
(१०) पार्थिवेष्वेवेति ङ० पुस्तकान्तरञ्च।

(क) ऋ० ७, ६८, ६ ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

भूयसे[क] वीतये[ख] चेति[१] वैद्युतेन तदस्ति हि[२] ॥७४॥
अथ स्याद्[३]भिधानस्य देवतायाः पृथक् पृथक्[४]।
ऋचोऽर्धर्चस्य पादस्य कथञ्ज्ञायेत[५] दैवतम् ॥७५॥
यथा निविदि सावित्र्यां स्तूयते कर्म कर्मणा[६]।
दोग्ध्री धेनु[ग]र्वोढानड्वानाशुः सप्तिपुरं धियाः[७] ॥७६॥
यथा वरुणमित्रीया[८] वरुणः प्राविता भुवत्[घ]।
सूक्तप्रायेणैभिरग्ने[९] परीच्यं[१०] तत्र देवताः[११] ॥७७॥
शब्दानां द्वैपदादीनां द्विदेवबहुदेवतम्।
असंस्तुतं संस्तुतवत्प्रदिष्टं दैवतं क्वचित् ॥७८॥

---

(१) ऊयसे वीतये चैतदिति क० घ० च०।
(२) वैद्युतेनेत्यतस्त्विहेति ख० ङ०।
(३) अतस्त्विदिति ङ० पुस्तकान्तरञ्च।
(४) स्तुतौ स्तुताविति ख० ङ० पुस्तकान्तरञ्च।
(५) ज्ञायेतेति ख० ङ० पुस्तकान्तरञ्च।
(६) सूर्य्यकर्म्मणेति ङ० पुस्तकान्तरञ्च।
(७) तथैव चेति क० घ० च०।
(८) यथा च शन्नो मित्रीयाः इति क० घ० च०।
(९) अग्नेरिति ख० ङ० पुस्तकान्तरञ्च।
(१०) परीच्यः इति ग०।
(११) परोक्षस्तत्र संस्तवः इति ङ० पुस्तकान्तरञ्च।

(क) ऋ० १, १९, १। (ख) ऋ० १, ५, ६।
(ग) ऋ० २, ३१, ७। (घ) ऋ० १, ३६, ८।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यत्र द्विदेवते मन्त्र एकवद्देवतोच्यते ।
विभक्तस्तुति तद्विद्यात् बहुव्यबहुवच्च तत्[१] ॥७९॥
आशीर्वादेषु संज्ञासु कर्मसंस्थासु देवताः ।
बह्वो हि बहुवद्यत्र[२] द्विवद्वौ यत्र संस्तुतौ[३] ॥८०॥
सुधन्वन[क] आङ्गिरसस्या[ख]सन् पुत्रास्त्रयः पुरा[४] ।
ऋभु[ग]र्विभ्वा[घ][५]च वाज[ङ]श्च[६]शिष्यास्ते त्वष्टुरेव च[७] ॥८१॥
शिक्षयामास तांस्त्वष्टा त्वाष्ट्रं यत्कर्म्म किञ्चन ।
परिनिष्ठितकर्म्माणो विश्वेदेवा उपाक्रयन् ॥८२॥
धेनुं सर्वदुघां चक्रुरमृतं सवरुच्यते ।
बृहतस्पतयेऽश्विभ्यां रथं दिव्यं त्रिबन्धुरम् ॥८३॥
इन्द्राय च हरी देवप्रहितेनाग्निनापि यत् ।

---

(१) बहुत्वबहुवच्च यदिति ङ० पुस्तकान्तरञ्च ।
(२) बह्वो हि बहुवाच्यत्र इति ख० ङ० पुस्तकान्तरञ्च ।
(३) द्विपदे यत्र संस्तुते इति क० ग० घ० च० ।
(४) आसन् सुधन्वनः पुत्रास्त्रय आङ्गिरसश्च ये इति ख० ङ० पुस्तकान्तरञ्च ।
(५) विश्वेति ग० घ० ।
(६) वायुश्चेति ख० ।
(७) त्वष्टुश्च तेऽभवन्निति ख० ग० ङ० पुस्तकान्तरञ्च ।

(क) ऋ० ५, ४२, ११ । (ख) ऋ० ४, ४०, १ । (ग) ऋ० १, ११०, ७ ।
(घ) ऋ० १, ११३, १ । (ङ) ऋ० १, २७, ८ ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

एकञ्च समभित्युक्ते ज्येष्ठो(१) द्वावित्यथाह च ॥८४॥
उक्त्वा ततचुश्चमसान्यथोक्तं तत्र हर्षिताः ।
त्वष्टा च सविता(२)यैव(३) देवदेवप्रजापतिः ॥८५॥
सर्व्वान् देवान् समामन्त्र्य चामृतत्वं ददुश्च ते ।
तेषामाद्यन्त्ययो(४) नाम्ना दृश्यते बञ्ज वस्त्रवः(५) ॥८६॥
विश्वेषां ते ततश्चक्रु(६)र्वाहनान्यायुधानि च ।
तृतीयसवने तेषां तेस्तु भागः प्रकल्पितः ॥८७॥
अपिव(क)त्सोममिन्द्रश्च तैस्तत्र सवने(७) (ख)सह ।
तेषां स्तुतिरिन्द्रसूक्तमय(८)मित्यार्भवं(९) परम् ॥८८॥

---

(१) त्वेष्ठेति पुस्तकान्तरं ।
(२) सविनेति ङ० ।
(३) यैवेत्यत्र चैवेतिपाठः समीचीनः ।
(४) आद्यन्तयोरिति सविसर्गान्तपाठो युक्तः ।
(५) धेनुं सवर्दुघामित्यदि दृश्यते बञ्जवस्त्रवः इत्यन्तपाठः क० ग० घ० च० चिह्नितपुस्तकेषु न विद्यते । दृश्यते बहवस्त्रव इत्यत्र, दृश्यन्ते बहवस्त्रवा इति पाठः साधुः ।
(६) ततस्तत्चुस्ते तद्वदिति ङ० पुस्तकान्तरञ्च ।
(७) सवनैरिति ग० ।
(८) त्वयमिति क० ग० घ० च० ।
(९) इत्यृक्कमिति ग०ङ० पुस्तकान्तरञ्च ।

(क) ऋ० १, ३२, ३। (ख) ऋ० १, १६, ५।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

इहेन्द्राग्नी सुतौ देवौ तृतीयस्यादिरश्विनौ[१]।
हिरण्यपाणिं[२] सावित्री तिस्रश्चाप्यत[३] उत्तराः[४] ॥८९॥
एकाग्नेर्द्वे तु देवानां[५] द्वादश्यो देवपत्नयः।
इन्द्राणी वरुणानी च आग्नेयी[६] च[७] पृथक् सुताः ॥९०॥
द्यावापृथिव्यौ द्वे च स्यात् स्योना[क]दिस्त्वेव पार्थिवी[ख][८]।
देवानां वात इत्येषा[९] सूक्तशेषस्तु वष्णवः ॥९१॥
वायोस्तोत्रेन्द्रवायुभ्यां द्व्यृचो द्वाभ्यां[१०] ततः परम्।
ऋचे[११] मित्रावरुणयोस्तथेन्द्राय मरुत्वते ॥९२॥

---

(१) आदितोऽश्विनाविति ङ० पुस्तकान्तरञ्च।
(२) हिरण्यपाणिरिति पाठो युक्तः।
(३) ऽप्यन्य इति ख०, सावित्र्यस्ततस्तोऽप्यत इति ङ० पुस्तकान्तरञ्च।
(४) चतस्रश्चाप्यथोत्तराः इति ग०।
(५) च देवीनामिति ङ० पुस्तकान्तरञ्च।
(६) अग्नायीति ख० ङ० पुस्तकान्तरञ्च।
(७) ता इति ख० ङ० पुस्तकान्तरञ्च।
(८) महीद्वे स्योनेत्यृक् पार्थिवी स्मृतेति ङ०।
(९) अतो देवा इति देवीति क० घ० च०।
(१०) ऋचो द्वाभ्यामिति क० ग० घ० ङ० पुस्तकान्तरञ्च, दृचस्ताभ्यामिति ख० ङ०।
(११) ऋचः इति ग० ङ० पुस्तकान्तरञ्च।

(क) ऋ० १, २२, १५। (ख) ऋ० ८, २५, ६।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

ऋचो[१] विश्वेषां देवानां पूष्ण आघृणये[क] तृचः[२]।
असक्तो हि घृणिस्तस्य दघ्नः पूर्णे दृती[ख]रथे[३] ॥९३॥
आरुणिस्तद्युतः पूषा स्व गोभिरिभ्यते यतः[४]।
यथा हि मधुनः पूर्णो दृतिर स्तौति चाश्विनौ[५] ॥९४॥
आवर्त्तनिं मधुनेति दृतेरिव च दृश्यते[६]।
अर्धाष्टमा अपां ज्ञेया अर्धर्चान्त्याग्निदेवता[७] ॥९५॥
कस्य नूनन्तु काप्याद्या आग्नेय्यृक् सवितुस्तृचः।
भगभक्तस्य[ग] भागो वा परं यदिति[८] वारुणम्[९] ॥९६॥
वसिष्वाहौति चाग्नेये ऋगग्नेर्मध्यमस्य तु।

---

(१) तृच इति ग० घ० ङ० च०।
(२) आघृणयेति चेति ख०, आघृणिरित्यृचः इति ग०, तत्राघृणयंति चेति ङ०।
(३) दतः रथे इति ङ० पुस्तकान्तरञ्च।
(४) गोरिभोरिभ्यते ततः इति ख०।
(५) दितिमर्थोति चाश्विनाविति ख०, वाश्विनौ इति ङ०।
(६) असक्तो हि घृणिस्तस्येत्यादि दृतिरेव च दृश्यते इत्यन्तपाठः क० ग० घ० च० चिह्नितपुस्तकेषु न दृश्यते।
(७) अध्यर्द्धान्त्याग्निदेवतेति ख० ङ०, अप्यर्द्धान्त्याग्निदेवतेति ग०।
(८) हि यच्चेति ग०।
(९) यच्चिद्धि वारुणे इति ङ०।

(क) ऋ० १, २३, १४। (ख) ऋ० ४, ४५, १। (ग) ऋ० १, २४, ५।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

जराबोधे[क]ति विज्ञेया वैश्वदेव्युत्तमोत्तमा[१] ॥९७॥
पराश्चतस्रो यास्त्वैन्द्रे चेन्द्रोलूखलयोः स्तुतिः[२] ।
मन्येते[३] यास्ककार्ष्ण्या[४]विन्द्रस्येति तु भागुरिः ॥९८॥
यच्चिद्युलूखलस्य द्वे द्वे परे मुसलस्य तु ।
चर्माधिषवणीयं[५] वा सोमं वान्या प्रशंसति ॥९९॥
ऐन्द्रं यच्चिद्धि सत्येत्युत्तरञ्चाश्विनात्तृचात्[६] ।
आश्विनादुत्तरस्त्वन्य उषस्[७] स्तृच उत्तमः ॥१००॥
स्तूयमानः शश्वदिति प्रीतस्तु मनसा ददौ ।
शुनःशेपाय[ख] दिव्यन्तु रथं सर्वं हिरण्मयम् ॥१०१॥
आग्नेयं सूक्त[८]मैन्द्रे च[९] त्रिश्चिदित्याश्विनं ततः ।
ऋतेऽर्थवादं कर्मैतदिन्द्रस्येति तु शंसति ॥१०२॥
पादोऽग्नये क्रयामीति मैत्रावरुण उत्तरः ।

---

(१) वैश्वदेव्युत्तमानमः इति क० ग० घ० च० ।
(२) यत्रेति मुसलोलूखलस्तुतिरिति ङ० पुस्तकान्तरञ्च ।
(३) मन्येतामिति ख० ङ० पुस्तकान्तरञ्च ।
(४) यास्ककाच्छ्क्याविति ङ० पुस्तकान्तरञ्च ।
(५) चर्म्माधिषवणीये इति ङ० ।
(६) आश्विनं ऋचमिति ङ० ।
(७) आश्विनेत्युत्तरं कस्त औषस्य इति ङ० पुस्तकान्तरञ्च । कस्त इत्यत्र कस्त्विति ख० ।
(८) यत्वमिति ख० ग० ङ० पुस्तकान्तरञ्च ।
(९) द्वे इति ङ० ।

(क) ऋ० १, २७, १० । (ख) ऋ० १, २४, १२ ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तृतीयो रात्रिसंस्तावः[१] सूक्तं सावित्रमुच्यते ॥१०३॥
पञ्चेमानि जगौ दृष्ट्या[२] सूक्तान्याङ्गिरसो मुनिः।
हिरण्यस्तूपतां प्राप्य[३] सख्यं चेन्द्रेण शाश्वतम् ॥१०४॥
आग्नेयं प्रेति मारुतं क्रीलं[४] [क]त्रीणि पराण्यतः।
सूक्तमुद्[५]ब्राह्मणस्यत्यं यं रचन्ति त्रयस्तृचाः ॥१०५॥
वरुणार्य्यममित्राणां मध्य आदित्यदैवतः।
पौष्णं सपूषन्[६] षड्रौद्र्य[७]स्तृतीया न तु केवला ॥१०६॥
मित्रेण वरुणेनात्र[८] विश्वैर्देवैश्च संस्तवः।
उक्तमत्रर्षिणा पूर्व्वमादेशाद्दैवतं विना ॥१०७॥
ज्ञातुं न शक्यते लिङ्गात्तथापि क्वचिदुच्यते।
आदित्या वसवो रुद्रास्त्वमग्न इति च स्तुताः ॥१०८॥
तृचः सौम्योऽग्न[९] आग्नेये प्रगाथेनाश्विनौ स्तुतौ।

---

(१) रात्रिः स्तुता तृतीयेनेति ङ०।
(२) दृष्ट्वेति ख० ग० ङ० पुस्तकान्तरञ्च।
(३) प्राप्तः इति ङ०।
(४) क्लीलमिति पुस्तकान्तरं।
(५) उत्तिष्ठेति ख० ङ० पुस्तकान्तरञ्च।
(६) सम्पुष्णन्निति पाठो विशुद्धः।
(७) पौष्णं संदशरौद्रकेति ङ० पुस्तकान्तरञ्च।
(८) वरुणेनास्येति ख० ङ० पुस्तकान्तरञ्च।
(९) सौम्यग्न इति पुस्तकान्तरं।

(क) ऋ० १, ३७, १।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सहोषसा लिङ्गभाजा वयं सोमः सुदानवः[१] ॥१०९॥
अर्धर्चो देवदेवत्य एष इत्याश्विने परे।
आदित्यं मन्यते यास्को हविषेति[२] सहस्रुतं[३] ॥११०॥
सहोषसे ततः सौर्य्यमुदुत्यमिति संस्तुतम्।
भक्तिर्येन वरुणोद्यु रोगघ्नस्तृच उत्तमः ॥१११॥
रोगोपनुद्य[४]माद्याभ्यामुद्यन्नित्युत्तमे तृचे।
अर्धर्चे तु द्विषद्द्वेष ऐन्द्रः सद्यः[५] [क]शतर्चिषु ॥११२॥
स्वयमिन्द्रसमं पुत्रमिच्छन्तोऽङ्गिरसो मुनेः।
वज्रेव[६] सद्यो भूत्वर्षि[७] र्योगित्वात्पुत्रताङ्गतः ॥११३॥
प्रथमे मण्डले ज्ञेया ऋषयस्तु शतर्चिनः।
क्षुद्रसूक्तमहासूक्ता अन्ये मध्येषु मध्यमाः[८] ॥११४॥

---

(१) उक्तमत्रर्षिणोत्यादि वयं सोमः सुदानवः इत्यन्तपाठः क० ग० घ० च० चिह्नितपुस्तकेषु न विद्यते।

(२) हविषेति पुस्तकान्तरं।

(३) आदित्यमित्यादि श्लोकार्द्धं क० ग० घ० च० चिह्नितपुस्तकेषु नोपलभ्यते।

(४) रोगापनुद्धीति ग०, रोगापनुतिविति ङ०।

(५) अद्यर्चन्तु द्विषद्द्वेषदैन्द्राण्यष्टेति ङ०।

(६) वज्रे चेति ख०।

(७) भूत्वर्षेरिति क० ग० घ० च०।

(८) प्रथमे मण्डले ज्ञेयेत्यादि अन्ये मध्येषु मध्यमा इत्यन्तपाठः क० घ० च० चिह्नितपुस्तकेषु नेक्ष्यते।

(क) ऋ० १, ८२, ५।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

नवकं जातवेदस्यं नूचिद्यत्तु वया इति।
वैश्वानरीयं तत्सूक्तमाग्नेयन्तु ततः परम्[१] ॥११५॥
ऐन्द्राण्यस्मै तत[२]स्त्रीणि वृष्णे शर्धाय[क] मारुतम्।
आग्नेयानि तु पश्वे[ख]ति नवशश्वद्धि वामिति[३] ॥११६॥
[४]दशाश्विनानीमानीति इन्द्रावरुणयोः स्तुतिः।
सौपर्णेयास्तु काश्चिच्च[५] निपात[६]स्तुतिषु स्तुताः ॥११७॥
उपप्रयन्तः[ग] सूक्तानि आग्नेयान्युत्तराणि षट्।
हिरण्यकेशो[घ] रजसस्तृचोऽग्नेर्मध्यमस्य तु ॥११८॥
इत्येति[७] पञ्च त्वैन्द्राणि[८] यामित्यस्यां निपातिताः।

---

(१) वह्निमाग्नेयमुत्तरमिति ख० ङ० पुस्तकान्तरञ्च।
(२) इडः इति ङ०।
(३) नवषड्द्वैपदानि त्विति ङ० पुस्तकान्तरञ्च।
(४) ङ० चिह्नितपुस्तके पुस्तकान्तरे च, दशाश्विनानीति श्लोकार्द्धस्थले, उपान्त्यं सप्तमेऽर्द्धर्चं न मैत्रावरुणं विदुरिति पाठोऽस्ति।
(५) याः काश्चिदिति ग० ङ० पुस्तकान्तरञ्च।
(६) निपाताः इति ङ० पुस्तकान्तरञ्च।
(७) इच्छेतीति ख० ङ० पुस्तकान्तरञ्च।
(८) चैन्द्राणीति ङ० पुस्तकान्तरञ्च।

(क) ऋ० १, ३७, ४। (ख) ऋ० १, ६५, १। (ग) ऋ०१, ७४, १। (घ) ऋ० १, ७९, १।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

दध्य(क)ङ्मनुरथर्वा च मारुतानि प्रये ततः ॥११९॥
चत्वार्य्यानो(ख) वैश्वदेवे द्वे देवानां स्तुतिर्मता(१)।
आनोभद्राश्च देवानां भद्रं यावच्छतं पुनः ॥१२०॥
मधुवातास्तृचे तस्मिन् परमं मध्वपीष्यते।
शान्त्यर्था शन्न इत्येषां वैश्वदेवी ऋगिष्यते(२) ॥१२१॥
(३)अदितिर्द्यौरिति त्वस्यां विभूतिः कथिता(४)दितेः।
त्वं सोमसौम्यमौषस्य(५) मेता उत्यास्तृचोऽश्विनोः ॥१२२॥
अग्निनाग्नेश्च(६) सोमस्य अग्नीसोमाविति स्तुतिः(७)।

---

(१) चत्वार्य्यान इति सूक्ते देवानां स्तुतिरुत्तरेति क० ख० घ० च०, चत्वार्य्यानो इत्यत्र चत्वार्य्याग्नाविति ख०।

(२) आनो भद्राश्च देवानामित्यादि वैश्वदेवी ऋगिष्यते इत्यन्तपाठः क० घ० च० चिह्नितपुस्तकेषु नोपलभ्यते।

(३) पुस्तकान्तरे, अदितिर्द्यौरिति श्लोकार्द्धं, आनो भद्राश्चेति श्लोकार्द्धात् परं पठितं।

(४) कथ्यते इति ख० ङ० पुस्तकान्तरञ्च।

(५) मेधस्यमिति ख०, मेधस्यमिति क० घ० च०।

(६) अश्विनाग्नेः ससेति क० घ० च०।

(७) विमं स्तुमे इति ङ० पुस्तकान्तरञ्च।

(क) ऋ० १, ८०, १६। (ख) ऋ० १०, ५५, ५।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

गोतमादौशिजः[क] कुत्सपरुच्छेपादृषेः[१] परः ॥१२३॥
इमं कुत्स[ख] आङ्गिरसो ददर्शजातवेदस्यं जगाद षोड़शर्चं।
पूर्वा देवा इत्यृचो देवदेवास्त्रयः पादा उत्तमायास्ततोऽर्द्धम् ॥१२४॥
तस्यैव वा यस्य तत्पूर्वमुक्तं मित्रादिभ्यो वात्र[२] षड्भ्यः प्रकृताभ्यः।
अन्त्योऽर्धर्चः षण्णां स्तुतानां पूर्वा देवाः पादैः स्तुतिभिः स्तुताः[३] ॥१२५॥
भरद्वाजे गृत्समदे वसिष्ठे नोधस्य[ग] गस्त्ये विमदे नभाके[घ]।
कुत्सेनोदर्कै[४] बहुदेवतेषु तथा द्विदेवेषु समानदेवधर्म्माः[५] ॥१२६॥

---

(१) गोतमो नाम य ऋषिः कुत्स आङ्गिरस इति क० घ० च०।

(२) वात्रेत्यत्र स्तुताप्रा इति क० घ०, स्तुताप्रो इति च०।

(३) ङ० चिह्नितपुस्तके पुस्तकान्तरे च,—

इमं कुत्स आङ्गिरसो ददर्श जातवेदसम्।
कुत्सादीर्घतमास्त्वेवमध्ये तारस्त्वधीयते ॥
पूर्व्वा देवास्ततो देवास्त्रिभिः पादैस्तु संस्तुताः।
षोडशर्चे तथा सूक्ते जगाद चतुरित्यसौ।
अन्त्येऽर्द्धर्चे तु वा षण्णां लिङ्गोक्तानां स्तुतौ गणः ॥

इति पाठो वर्त्तते।

क० घ० च० चिह्नितपुस्तकेषु, कुत्सादीर्घतमास्त्वेतीति श्लोकार्द्धस्थले कुत्सादीर्घतमा इति ते द्वे एवमधीयते। इति पाठोऽस्ति। इतीत्यत्र पुश्चदिति ग०।

(४) कुत्सेनोदर्केति क० घ० च०।

(५) समानधर्म्मिणः इति ख० ग० ङ० पुस्तकान्तरञ्च।

(क) ऋ० १, १८, १। (ख) ऋ० १, १०६, ६। (ग) ऋ० १, ६१, १४। (घ) ऋ० ८, ४०, ४।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

द्वे विरूपे सूक्तमौषसाग्नये[१] सप्रन्नये[क]ति द्रविणोदसेऽग्नये ।
वैश्वानरस्येति[२] वैश्वानरीयमुक्तमस्मात्पूर्वं शुचयेऽग्नये पुनः ॥१२७॥
जातवेदस्यं सूक्तसहस्रमेक ऐन्द्रात्पूर्वं कश्यपार्षं वदन्ति ।
जातवेदसे सूक्तमाद्यन्तु तेषामेकभूयस्त्वं मन्यते शाकपूणिः ।१२८॥
दृचाद्या[३] सहस्रर्चान्तं सूक्तं नानाविधं भवेत् ।
नवनवतिः पञ्चलचा ऋचः स्युः सचतुःशतम् ॥१२९॥
नानादैवतमेकार्षं छन्दोभिश्चित्रमुत्पथम्[४] ।
[५]सयोवृषेन्द्राणि पञ्च वैश्वदेवानि चन्द्रमाः १३०॥
त्रीण्यैन्द्राग्नेय इन्द्राग्नी ततमित्यार्भवे परे ।
चितं[ख] गास्त्वनुगच्छन्तं क्रूराः साला[६] वृकी[ग] सुताः ॥१३१॥

---

(१) औषस्यमग्नेर्वेति ङ० पुस्तकान्तरं ।

(२) वैश्वानरस्येति ये इति ग० ।

(३) दृचाद्यमिति पाठः शुद्धः ।

(४) वैश्वानरस्येति वैश्वानरीयमित्यादि छन्दोभिश्चित्रमुत्पथमित्यन्तपाठः क० घ० च० चिह्नितपुस्तकेषु न विद्यते । जातवेदस्यं सूक्तसहस्रमित्यादि छन्दोभिश्चित्रमुत्पथमित्यन्तपाठः ग० चिह्नितपुस्तके न दृश्यते । दृचाद्या सहस्रर्चान्तमित्यादि छन्दोभिश्चित्रमुत्पथमित्यन्तपाठः ख० चिह्नितपुस्तके नेच्यते ।

(५) क० घ० च० चिह्नितपुस्तकेषु सयोवृषेन्द्राणीति श्लोकार्द्धात् प्राक्, अयनः शुचयेऽग्नये वैश्वानरीयं जातवेदस इति जातवेदस्यम् । इत्यधिकं पठितम् ।

(६) शालेति ग० ङ० ।

(क) ऋ० १, ९६, १ । (ख) ऋ० २, ३४, १० । (ग) ऋ० १, ११७, १८ ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

कूपे प्रक्षिप्य गाः[१] सर्वास्तत एवापजज्ञिरे[२] ।
स तत्र सुषुवे सोमं मन्त्रवि[३]न्मन्त्रवित्तमः ॥१३२॥
देवांश्चावाहयन् सर्वांस्तच्छुश्राव बृहस्पतिः ।
आगच्छतोऽथ तान् दृष्ट्वा क्व वसत्यस्य तत्त्वलम् ॥१३३॥
सर्वं दृक्तञ्च वरुणस्यार्य्यम्ण इत्युपालभत् ।
कूपेष्टकाभिर्व्रणितान्यङ्गान्येवाभवन्मम ॥१३४॥
दृष्ट्वा सर्वानहं स्तौमि यद्यप्येको न पश्यति[४] ।
बृहस्पतिप्रचोदिता विश्वेदेवगणास्त्रयः ॥१३५॥
जग्मुस्ते[५] तस्य तं यज्ञं भागांश्च जगृहुः सह ।
बृहस्पति[६]स्त्रितस्यैतत्[७] ज्ञानं विज्ञानमेव च ॥१३६॥
तृचेनान्येन सूक्तेन जगादर्षिरसाविति ।
द्यावापृथिव्यावीलेति आग्नेयः[८] पाद उत्तरः ॥१३७॥
आश्विनः सूक्तशेषः स्यादिदं रात्र्युषसोः स्तुतिः ।

---

(१) ताः इति ख० ग० ङ० पुस्तकान्तरञ्च ।
(२) एवाप्य जज्ञिरे इति ङ० पुस्तकान्तरञ्च ।
(३) तत्र सोमं सुषावासौ मन्त्रवदिति ङ० पुस्तकान्तरञ्च ।
(४) आगच्छतोऽथेत्यादि यद्यप्येको न पश्यतीत्यन्तपाठः क० ग० घ० च० चिह्नितपुस्तके नोपलभ्यते ।
(५) आजग्मुरिति ख० ङ० पुस्तकान्तरञ्च ।
(६) बृहस्पतेरिति ख० ङ० पुस्तकान्तरञ्च ।
(७) त्रितस्यैतमिति क० घ० च० ।
(८) द्यावापृथिव्योरीले चेत्याग्नेयः इति ङ० पुस्तकान्तरञ्च ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

इमा रौद्रं ततः(१) सौर्यं चित्रं पञ्चाश्विनान्यतः ॥१३८॥
नासत्याभ्यामिति त्वन्ये अर्धर्ग्दुःस्वप्ननाशिनी(२)।
ऐन्द्रव(३)द्वैश्वदेवञ्च प्रोषसे पृथुरुत्तरे ॥१३९॥
ऋषिर्दानञ्च(४) भाव्यस्य(क) प्रातरित्यत्र शंसति।
कक्षीवता(ख) विदित्वेति(५) यदैन्द्रमुपदिश्यते ॥१४०॥
परोक्षं वैश्वदेवं(६) तत् प्रदिष्टं स्वरसामसु।
अधिगम्य गुरोर्विद्यां गच्छन् स्वनिलयं प्रति ॥१४१॥
कक्षीवानध्वनि श्रान्तः सुष्वापारण्यगोचरः।
तं राजा स्वनयो नाम भावयव्यसुतो(७)व्रजन् ॥१४२॥
क्रीड़ार्थं सानुगोऽपश्यत् सभार्यः सपुरोहितः।
अथैनं रूपसम्पन्नं दृष्ट्वा देवसुतोपमम् ॥१४३॥
कन्यादाने मतिं चक्रे वर्णगोत्राविरोधतः।
सम्बोध्यैनं स पप्रच्छ वर्णगोत्रादिकं तदा ॥१४४॥
राजन्नाङ्गिरसोऽस्मीति कुमारः प्रत्युवाच तम्।

---

(१) परमिति क० घ० च०।
(२) त्वन्येन्या दुःस्वप्ननाशिनीति क० ग० घ० च०।
(३) ऐन्द्रकदिति ङ०, ऐन्द्रं वेति च०।
(४) त्विति ङ०।
(५) कक्षीवतं कदित्यातीति क० ग० घ० च०।
(६) परोक्षे वैश्वदेवे इति ङ०।
(७) भावयव्यस्तत इति ङ०।

(क) ऋ० २, १२६, १। (ख) ऋ० १, ११७, ६।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पुत्रोऽहं दीर्घतमस औचथस्य[क] ऋषेर्नृप[१] ॥ १४५॥
अथास्मै स ददौ कन्यां[२] दिव्याभरणभूषिताम्[३] ।
तावतश्च रथानश्वान् वीड्वङ्गान् वै[४] चतुर्युजः ॥ १४६॥
बधूनां वाहनार्थाय धनकूप्य[५]मजाविकम् ॥
निष्काणां वृषभाणाञ्च[६] शतं शतमदात्पुनः ॥ १४७॥
गवां सहस्रं षष्टीश्च सर्व्वाः खल्वरिधायसः[७][ख] ।
शतमश्वाञ्छतं निष्कान्रथान् दशबधूमतः ॥ १४८॥
चतुर्युजो गवाञ्चैव सहस्रं षष्ट्यधाधिकम्[८] ।
स्वनयाद्भावयव्याद्यः कक्षीवान् प्रत्यपद्यत ॥ १४९॥
प्रतिगृह्य च तुष्टाव प्रातः[९] पित्रे शशंस च ॥
एतदुत्तरसूक्तेन शतमित्यादिनोदितम्[१०] ॥ १५०॥

---

(१) राजन्नाङ्गीरसोऽस्मीत्यादि औचथस्य ऋषेर्नृपेत्यन्तपाठः ङ० चिह्नितपुस्तके न दृश्यते ।
(२) कन्याः इति ङ० ।
(३) दशभारसमन्विताः इति ङ० ।
(४) रथांश्चास्य द्वीपिनोऽश्वैरिति ङ० ।
(५) धनं कूप्यमिति ङ० ।
(६) निष्काणां शतमश्वानामिति ङ० ।
(७) गवां सहस्रमिति श्लोकार्द्धं ङ० चिह्नितपुस्तके न विद्यते ।
(८) षष्ट्युपाधिकमिति ङ० ।
(९) ततः इति ङ० ।
(१०) ङ० चिह्नितपुस्तके, एतदुत्तरसूक्तेनेति श्लोकार्द्धस्थले, एतत्तदुत्तरे सूक्ते शतमित्यादि चोच्यते इति पाठोऽस्ति, शतमश्वाञ्छतं निष्कानिति श्लोकार्द्धात्प्राक् पठितश्च ।

(क) ऋ० १, १५८, १ । (ख) ऋ० १, १२६, ५ ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

फलप्रदर्शनं तस्य क्रियते प्रायसस्त्विह।
द्वितीयान्तु पितापश्यत्सुगु(क)रित्यादिकाम्बृचम् ॥१५१॥
कच्चीवतं(१) सर्व्वमिति भगवानाह शौनकः।
एषा तु दैर्घतमसी सानुलिङ्गा कथं भवेत् ॥१५२॥
उच्यचे प्रातरि(ख)त्सूक्ते सूनोर्दानेन हर्षितः।
राज्ञश्चाग्निषमाहाथ सुगुरित्यादिना किल(२) ॥१५३॥
कर्माणि याभिः कथितानि राज्ञां(३)
दानानि चोच्चावचमध्यमानि।
नाराशंसी(ग)रित्यृचस्ताः प्रतीया-
द्याभिः स्तुतिर्दाशतयीषु राज्ञां(४) ॥१५४॥
पञ्चामन्दान् भावयव्यस्य गीता
जायापत्योर्द्वौ ऋचौ सम्प्रवादः(५)।

---

(१) काच्चीवतमिति पाठः समीचीनः।
(२) अधिगम्य गुरोर्विद्यामित्यादि सुगुरित्यादिना किलेत्यन्तपाठः क० घ० च० चिह्नितपुस्तकेषु न विद्यते। फलप्रदर्शनं तस्येत्यादि सुगुरित्यादिना किलेत्यन्तपाठोऽपि ख० ङ० चिह्नितपुस्तकयोर्न दृश्यते।
(३) कर्म्माणि यावन्ति कृतानि राज्ञेति ङ०।
(४) प्रतीयात् स्तुती दृष्टा यासु वरिष्ठराज्ञामिति ङ० पुस्तकान्तरञ्च।
(५) सम्प्रवादो द्वुचेनेति क० घ० च०॥

(क) ऋ० १, १२५, २। (ख) ऋ० १, १, ४। (ग) १०, ८५, ६।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

Pingala Chhandaḥ Sútra, (Sans.) Fasc. II—III @ /6/ each	Rs.	0	12
Prithiráj Rásau, (Sans.) Part I, Fasc. I, Part II, Fasc. I—V @ /6/ each		2	4
Ditto (English) Part II Fasc. I		0	12
Prákṛita Lakshaṇam, (Sans.) Fasc. I		1	8
Parásara Smṛiti (Sans.) Vol. I, Fasc. 1—7, Vol. II, Fasc. 1—2, @ /6/ each		3	6
Paráśara, Institutes of (English)		0	12
Śrauta Sútra of Ápastamba, (Sans.) Fasc. I—XII @ /6/ each ..		4	8
Ditto Áśvaláyana, (Sans.) Fasc. I—XI @ /6/ each ..		4	2
Ditto Látyáyana (Sans.) Fasc. I—IX @ /6/ each ..		3	6
Ditto Śánkháyana (Sans.) Fasc. I—VII @ /6/ each ..		2	10
Sáma Veda Saṃhitá, (Sans.) Vols I, Fasc. 2—10; II, 1—6; III, 1—7; IV, 1—6; V, 1—8, @ /6/ each Fasc.		13	8
Saṃkhya Sutra Vritti (Sans.) Fasc. I and II @ /6/ each		0	12
Sáhitya Darpaṇa, (English) Fasc. I—IV @ /6/ each		1	8
Sánkhya Aphorisms of Kapila, (English) Fasc. I and II @ /6/ each ..		0	12
Sarva Darśana Sangraha, (Sans.) Fasc. II		0	6
Sankara Vijaya, (Sans.) Fasc. II and III @ /6/ each		0	12
Sánkhya Pravachana Bháshya, Fasc. III (English preface only) ..		0	6
Śri Bháshyam, (Sans.) Fasc. I		0	6
Suśruta Saṃhitá. (Eng.) Fasc. I and II @ /12/ each		1	8
Taittiríya Áraṇya (Sans.) Fasc. I—XI @ /6/ each		4	2
Ditto Bráhmaṇa (Sans.) Fasc. I—XXIV @ /6/ each		9	0
Ditto Saṃhitá. (Sans.) Fasc. II—XXXIV @ /6/ each		12	6
Ditto Prátiśákhya, (Sans.) Fasc. I—III @ /6/ each		1	2
Ditto and Aitareya Upanishads, (Sans.) Fasc. II and III @ /6/ each		0	12
Táṇḍyá Bráhmaṇa, (Sans.) Fasc. I—XIX @ /6/ each		7	2
Tattva Chintámaṇi, Vol. I, Fasc. I—IX; Vol. II, 1—2 (Sans.) @ /6/ each		4	2
Tul'sí Sat'saí, (Sans.) Fasc. I		0	6
Uttara Naishadha. (Sans.) Fasc. III, V—XII @ /6/ each		3	6
Uvásagadasáo, (Sans.) Fasc. I—V @ /12/		3	12
Varáha Puráṇa, (Sans.) Fasc. I—XI @ /6/ each		4	2
Váyu Puráṇa, (Sans.) Vol. I, Fasc. I—VI; Vol. II, Fasc. I—VII, @ /6/ each Fasc.		4	14
Vishṇu Smṛiti, (Sans.) Fasc. I—II @ /6/ each		0	12
Vivádáratnákara. (Sans.) Fasc. I—VII @ /6/ each		2	10
Vrihannáradíya Puráṇa, (Sans.) Fasc. I—V @ /6/		1	14
Yoga Sútra of Patañjali, (Sans. & English) Fasc. I—V @ /14/ each ..		4	6

Tibetan Series.

Sher-Phyin—Fasc. I—II @ /1/ each		2	0
Rtogs brjod dpag bsam hkhri S'iñ (Tibetan & Sans.) Fasc. I. ..		1	0

Arabic and Persian Series.

'Alamgírnámah, with Index, (Text) Fasc. I—XIII @ /6/ each ..		4	14
Áín-i-Akbarí, (Text) Fasc. I—XXII @ 1/ each		22	0
Ditto (English) Vol. I (Fasc. I—VII)		12	4
Akbarnámah, with Index, (Text) Fasc. I—XXXVII @ 1/ each		37	0
Bádsháhnámah with Index, (Text) Fasc. I—XIX @ /6/ each ..		7	2
Beale's Oriental Biographical Dictionary. pp. 291, 4to., thin paper ..		4	8
Dictionary of Arabic Technical Terms, and Appendix, Fasc. I—XXI @ 1/ each		21	0
Farhang-i-Rashídí (Text), Fasc. I—XIV @ 1/ each		14	0
Fihrist-i-Túsí, or, Ṭúsy's list of Shy'ah Books, (Text) Fasc. I—IV @ /12/ each		3	0
Futúh-ul-Shám Waqídí, (Text) Fasc. I—IX @ /6/ each		3	6
Ditto Ázádí, (Text) Fasc. I—IV @ /6/ each		1	8
Haft Asmán, History of the Persian Mansawi (Text) Fasc. I ..		0	12
History of the Caliphs, (English) Fasc. I—VI @ /12/ each ..		4	8
Iqbálnámah-i-Jahángiri, (Text) Fasc. I—III @ /6/ each ..		1	2
Iṣabáh, with Supplement, (Text) 51 Fasc. @ /12/ each		38	4
Maásir-ul-Umara. Vol. I, Fasc. 1—9, Vol. II, Fasc. 1—8 @ /6/ each ..		6	6
Maghází of Wáqidí. (Text) Fasc. I—V @ /6/ each		1	14
Muntakhab-ul-Tawáríkh. (Text) Fasc. I—XV @ /6/ each		5	10
Muntakhab-ul-Tawáríkh (English) Vol. II, Fasc. I—IV @ /12/ each ..		3	0

(*Turn over.*)

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

Muntakhab-ul-Lubáb, (Text) Fasc. I—XIX @ /6/ each ..	Rs.	7	4
Mu'áṣir-i-'Alamgírí (Text), Fasc. I—VI @ /6/ each		2	2
Nokhbat-ul-Fikr, (Text) Fasc. I		0	6
Nizámí's Khiradnámah-i-Iskandarí, (Text) Fasc. I and II @ /12/ each ..		1	8
Suyúty's Itqán, on the Exegetic Sciences of the Koran, with Supplement, (Text) Fasc. II—IV, VII—X @ 1/ each		7	0
Tabaqát-i-Náṣirí, (Text) Fasc. I—V @ /6/ each		1	14
Ditto (English) Fasc. I—XIV @ /12/ each		10	8
Táríkh-i-Fírúz Sháhí of Ziaa-al-dín Barní (Text) Fasc. I—VII @ /6/ each		2	10
Táríkh-i-Baihaqí, (Text) Fasc. I—IX @ /6/ each		3	6
Táríkh-i-Firozsháhí, of Shams-i-Siráj Afif. (Text) Fasc. I—IV @ /6/ each		1	8
Wis o Rámín, (Text) Fasc. I—V @ /6/ each		1	14
Zafarnámah, Vol. I, Fasc. I—IX, Vol. II. Fasc. I—VIII @ /6/ each..		6	6
Túzak-i-Jahángírí (English) Fasc. I		0	12

ASIATIC SOCIETY'S PUBLICATIONS.

1.	ASIATIC RESEARCHES. Vols. VII, IX to XI; Vols. XIII and XVII, and Vols. XIX and XX @ /10/ each ..	Rs. 80	0
	Ditto Index to Vols. I—XVIII	5	0
2.	PROCEEDINGS of the Asiatic Society from 1865 to 1869 (incl.) @ /4/ per No.; and from 1870 to date @ /6/ per No.		
3.	JOURNAL of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1850 (7), 1851 (7), 1857 (6), 1858 (5), 1861 (4), 1864 (5), 1865 (8), 1866 (7), 1867 (6), 1868 (6), 1869 (8), 1870 (8), 1871 (7), 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7). 1880 (8), 1881 (7), 1882 (6), 1883 (5), 1884 (6), 1885 (6) 1886 (8), 1887 (7). @ 1/ per No. to Subscribers and @ 1/8 per No. to Non-Subscribers, *N. B. The figures enclosed in brackets give the number of Nos. in each Volume.*			
4.	Centenary Review of the Researches of the Society from 1784—1883 ..	3	0
	General Cunningham's Archæological Survey Report for 1863-64 (Extra No., J. A. S. B., 1864)	1	8
	Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., J. A. S. B., 1868)	1	8
	Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., J. A. S. B., 1875)	3	0
	Sketch of the Turki Language as spoken in Eastern Turkestan, Part II, Vocabulary, by R. B. Shaw (Extra No., J. A. S. B., 1878) ..	3	0
	Introduction to the Maithili Language of North Bihár, by G. A. Grierson, Part I, Grammar (Extra No., J. A. S. B., 1880)	1	8
	Part II, Chrestomathy and Vocabulary (Extra No., J. A. S. B., 1882)..	3	0
5.	Anis-ul-Musharrahin	3	0
6	Catalogue of Fossil Vertebrata	2	0
7.	Catalogue of the Library of the Asiatic Society, Bengal	3	8
8.	Examination and Analysis of the Mackenzie Manuscripts by the Rev. W. Taylor	2	0
9.	Han Koong Tsew, or the Sorrows of Han, by J. Francis Davis ..	1	8
10.	Iṣṭiláhát-uṣ-Ṣúfíyah, edited by Dr. A. Sprenger, 8vo.	1	0
11.	Ináyah, a Commentary on the Hidayah, Vols. II and IV, @ 16/ each ..	32	0
12.	Jawámi-ul-'ilm ir-riyází, 168 pages with 17 plates, 4to. Part I ..	2	0
13.	Khizánat-ul-'ilm	4	0
14.	Mahábhárata, Vols. III and IV, @ 20/ each	40	0
15.	Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I—III, with 8 coloured Plates, 4to. @ 6/ each	18	0
16.	Purana Sangraha, I (Markandeya Purana), Sanskrit	1	0
17.	Sharaya-ool-Islám	4	0
18.	Tibetan Dictionary by Csoma de Körös	10	0

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust

on the date last stamped. A fine of one anna will be charged for each day the book is kept overdue

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

A book borrowed must be returned within one month of its issue. It may be reissued for fifteen days, if not requisitioned by another member. Members residing outside Srinagar may return books within forty days of their issue.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust

Digitized by eGangotri and Sarayu Trust.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust